| **पञ्चमी** | सज्जाअत्तो सज्जाआओ सज्जाआउ सज्जाआहिँ सज्जाआहिन्तो सज्जाआ | सज्जाअत्तो सज्जाआओ सज्जाआउ सज्जाआहि सज्जाएहि सज्जाआहिन्तो सज्जाएहिन्तो सज्जाआसुन्तो सज्जाएसुन्तो |
| **षष्ठी** | सज्जाअस्स | सज्जाआणं सज्जाआण |
| **सप्तमी** | सज्जाए सज्जाअम्मि | सज्जाएसुं सज्जाएसु |

**सम्बोधनम्** हे सज्जाओ हे सज्जाअ हे सज्जाआ

## ॥ अथोपाध्याय-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | ऊज्जाओ ओज्जाओ उवज्जाओ | ऊज्जाआ ओज्जाआ उवज्जाआ |
| **द्वितीया** | ऊज्जाअं ओज्जाअं उवज्जाअं | ऊज्जाए ऊज्जाआ ओज्जाअे ओज्जाआ उवज्जाए उवज्जाआ |

इत्यादि

## ॥ अथोपवास-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | ऊआसो ओआसो उववासो | ऊआसा ओआसा उववासा |

इत्यादि ॥ ऊच्चोपे ॥ ८ । १ । १७३ ॥ उपशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऊत् ओच्चादेशौ वा भवतः

## ॥ अथाचार्य-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | आइरिओ आयरिओ | आइरिआ आयरिआ |

इत्यादि ॥ आचार्ये चोऽच्च ॥ ८ । १ । ७३ ॥ इत्यनेन चकारस्थितस्याऽऽकारस्येत्वमत्वं च भवति ।

॥ स्याद्भव्यचैत्यचौर्यसमेषु यात् ॥ ८ । २ । १०७ ॥ इत्यनेन यात्पूर्व इकारः ।

## ॥ अथ भव्यशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भविओ | भविआ |
| द्वितीया | भविअं | भविए भविआ |

इत्यादि । भव्वो भव्वा इत्याद्यपि ।

एवं भविकशब्दस्यापि । भविओ भविआ । इत्यादि ।

## ॥ अथ सूर्यशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सूरिओ | सूरिआ |
| द्वितीया | सूरिअं | सूरिए सूरिआ |

इत्यादि । सुज्जो सुज्जा इत्याद्यपि भवति ।

## ॥ अथ स्याद्वादशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सिआ-वाओ | सिआ-वाआ |
| द्वितीया | सिआ-वाअं | सिआवाए सिआवाआ |
| तृतीया | सिआ-वाएणं<br>सिआ-वाएण | सिआ-वाएहि सिआ-वाएहिँ सिआ-वाएहिं |
| पञ्चमी | सिआ-वाअत्तो<br>सिआ-वाआओ<br>सिआ-वाआउ<br>सिआ-वाआहि<br>सिआ-वाआहिन्तो<br>सिआ-वाआ | सिआ-वाअत्तो सिआ-वाआओ<br>सिआ-वाआउ<br>सिआ-वाआहि<br>सिआ-वाएहि<br>सिआ-वाआहिन्तो<br>सिआ-वाएहिन्तो<br>सिआ-वाआसुन्तो<br>सिआ-वाएसुन्तो |
| षष्ठी | सिआ-वाअस्स | सिआ-वाआणं<br>सिआ-वाआण |
| सप्तमी | सिआ-वाए<br>सिआ-वाअम्मि | सिआ-वाएसुं<br>सिआ-वाएसु |
| सम्बोधनम् | हे सिआ-वाओ<br>हे सिआ-वाअ | हे सिआ-वाआ |

## ॥ अथोपसर्ग-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | उवसग्गो | उवसग्गा |
| द्वितीया | उवसग्गं | उवसग्गे उवसग्गा |

इत्यादि

## ॥ अथ शपथशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सवहो | सवहा |
| द्वितीया | सवहं | सवहे सवहा |

इत्यादि

## ॥ अथ शापशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सावो | सावा |
| द्वितीया | सावं | सावे सावा |

इत्यादि

कगचजेत्यादिना पकारस्य लुकि प्राप्ते, नावर्णात्पः ॥ ८ । १ । १७९ ॥ इत्यनेनादेः पकारस्य लुग् न भवति ।

## ॥ अथ स्तवशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | थवो तवो | थवा तवा |
| द्वितीया | थवं तवं | थवे थवा<br>तवे तवा |

इत्यादि ॥ स्तवे वा ॥ ८ । २ । ४६ ॥ इत्यनेन स्तस्य थकारः ।

## ॥ अथोष्ट्र-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | उट्टो | उट्टा |
| **द्वितीया** | उट्टं | उट्टे उट्टा |

इत्यादि ॥ ष्टस्यानुष्ट्रेष्टासंदष्टे ॥ ८ । २ । ३४ ॥ उष्ट्रादिवर्जिते ष्टस्य ठो भवतिं । इष्टाशब्दस्य, इट्टा संदष्टशब्दस्य संदट्टो इत्यादि ।

## ॥ अथ पुष्टशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पुट्ठो | पुट्ठा |
| **द्वितीया** | पुट्ठं | पुट्ठे पुट्ठा |

इत्यादि

## ॥ अथ प्रद्युम्नशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पज्जुण्णो | पज्जुण्णा |
| **द्वितीया** | पज्जुण्णं | पज्जुण्णे पज्जुण्णा |

इत्यादि ॥ द्यय्यर्यां जः ॥ ८ । २ । २४ ॥ इत्यनेन जः ॥ म्नज्ञोर्णः ॥ ८ । २ । ४२ ॥ इत्यनेन ज्ञस्य णत्वे कृते पज्जुण्णो इति रूपं सिद्ध्यति ।

## ॥ अथ चतुर्थशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | चउट्ठो चोत्थो<br>चउत्थो | चउट्ठा<br>चउत्था |

इत्यादि

## ॥ अथ चतुर्वारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | चोव्वारो चउवारो | चोव्वारा चउवारा |
| द्वितीया | चोव्वारं चउव्वारं | चोव्वारे चउव्वारे<br>चोव्वारा चउव्वारा |

इत्यादि

## ॥ अथ मयूखशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मोहो मऊहो | मोहा मऊहा |

इत्यादि

## ॥ अथ चतुर्गुणशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | चोग्गुणो चउग्गुणो | चोग्गुणा चउग्गुणा |

इत्यादि

## ॥ अथ सुकुमारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सोमालो सुकुमालो | सोमाला सुकुमाला |

इत्यादि

## ॥ अथोदूखल-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | ओहलो उऊहलो | ओहला उऊहला |

इत्यादि

॥ नवा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले ॥ ८ । १ । १७१ ॥ इत्यनेनादेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओकारो वा भवति ।

## ॥ अथ पङ्कशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पंको पङ्को | पंका पङ्का |
| द्वितीया | पंकं पङ्कं | पंके पङ्के<br>पंका पङ्का |

इत्यादि । एवं शङ्ककण्टकषण्ढबन्धवबान्धवारम्भादयः ।

## ॥ अथ पन्थशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पन्थो पंथो | पन्था पंथा |
| द्वितीया | पन्थं पंथं | पन्थे पन्था<br>पंथे पंथा |

इत्यादि । पथिशब्दसमानार्थकोऽयं पन्थशब्दः ॥ वर्गेऽन्त्यो वा ॥ ८ । १ । ३० ॥ इत्यनेन वर्गस्यान्त्यो वा भवति ।

## ॥ अथ चन्द्र शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | चन्दो चंदो<br>चन्द्रो चंद्रो | चन्दा चंदा<br>चन्द्रा चंद्रा |

इत्यादि ॥ द्रेरो नवा ॥ ८ । २ । ८० ॥ इत्यनेन द्रशब्दे रेफस्य वा लुक् । एवं रुद्र–समुद्रादय ।

**॥ अथार्थावग्रह–शब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अत्थुग्गहो | अत्थुग्गहा |
| द्वितीया | अत्थुग्गहं | अत्थुग्गहे अत्थुग्गहा |

इत्यादि ॥ अवापोते ॥ ८ । १ । १७२ ॥ इत्यनेन अव इत्यस्य ओकारे कृते । ह्रस्वः संयोगे, इत्यनेन ह्रस्वे कृते । अत्थुग्गहो यस्यावग्रहशब्दस्य जस्सुग्गहो, इत्यादि ।

**॥ अथ ग्राह्यशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | गेज्जो | गेज्जा |
| द्वितीया | गेज्जं | गेज्जे गेज्जा |

इत्यादि ॥ एद् ग्राह्ये ॥ ८ । १ । ७८ ॥ इत्यनेन एकारः ॥ ह्रस्वः संयोगे, इत्यनेन ह्रस्वे कृते । गिज्जो गिज्जा इत्यादि ।

**॥ अथ मद्याङ्गशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मज्जंगो | मज्जंगा |
| द्वितीया | मज्जंगं | मज्जंगे मज्जंगा |

इत्यादि

**॥ अथ व्यापारशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वावारो | वावारा |
| द्वितीया | वावारं | वावारे वावारा |

इत्यादि

**॥ अथ षड्विधशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | छव्विहो | छव्विहा |
| **द्वितीया** | छव्विहं | छव्विहे छव्विहा |

इत्यादि

**॥ अथ चार्वाकशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | चव्वाओ | चव्वाआ |

इत्यादि

**॥ अथ अथाकार-शब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | आगारो | आगारा |

इत्यादि

**॥ अथाकर-शब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | आगरो | आगरा |

इत्यादि

**॥ अथाधार-शब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | आहारो आधारो | आहारा आधारा |

इत्यादि, एवमाहारशब्दस्यापि ।

### ॥ अथाकाश-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | आगासो | आगासा |
| द्वितीया | आगासं | आगासे आगासा |

इत्यादि

### ॥ अथारब्ध-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | आढत्तो आरद्धो | आढत्ता आरद्धा |
| द्वितीया | आढत्तं आरद्धं | आढत्ते आढत्ता<br>आरद्धे आरद्धा |

इत्यादि

### ॥ अथ पक्ष-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पक्खो | पक्खा |
| द्वितीया | पक्खं | पक्खे पक्खा |
| तृतीया | पक्खेणं पक्खेण | पक्खेहि पक्खेहिँ<br>पक्खेहिं |

इत्यादि

### ॥ अथ विद्यमानशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | विज्जमाणो | विज्जमाणा |
| द्वितीया | विज्जमाणं | विज्जमाणे विज्जमाणा |

इत्यादि

## ॥ अथाभ्युपगम-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अब्भुवगमो | अब्भुवगमा |
| द्वितीया | अब्भुवगमं | अब्भुवगमे अब्भुवगमा |

इत्यादि

## ॥ अथ चतुर्भुजशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | चउब्भुजो | चउब्भुजा |

इत्यादि

## ॥ अथ सव्यशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सव्वो | सव्वा |
| द्वितीया | सव्वं | सव्वे सव्वा |

इत्यादि

## ॥ अथ नानारूपशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | णाणारूवो | णाणारूवा |
| द्वितीया | णाणारूवं | णाणारूवे णाणारूवा |

इत्यादि

## ॥ अथानतिरिक्त-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अणइरित्तो | अणइरित्ता |

इत्यादि

## ॥ अथ निक्षेपशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | णिक्खेवो | णिक्खेवा |
| द्वितीया | णिक्खेवं | णिक्खेवे णिक्खेवा |

इत्यादि

## ॥ अथ श्रुतस्कन्धशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सुअक्खन्धो | सुअक्खन्धा |
| द्वितीया | सुअक्खन्धं | सुअक्खन्धे सुअक्खन्धा |

इत्यादि ॥ ष्क-स्कयोर्नाम्नि ॥ ८ । २ । ४ ॥ इत्यनेन खकारः

## ॥ अथ पार्श्वस्थशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पासत्थो | पासत्था |
| द्वितीया | पासत्थं | पासत्थे पासत्था |

इत्यादि

## ॥ अथ संविग्नशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | संविग्गो संविण्णो | संविग्गा संविण्णा |

इत्यादि

## ॥ अथोद्विग्न-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | उव्विग्गो उव्विण्णो | उव्विग्गा उव्विण्णा |

इत्यादि

## ॥ अथाष्टम-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | अट्ठमो | अट्ठमा |
| **द्वितीया** | अट्ठमं | अट्ठमे अट्ठमा |

इत्यादि

## ॥ अथ कुल शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | कुलो | कुला |
| **द्वितीया** | कुलं | कुले कुला |

इत्यादि ॥ वाक्ष्यर्थवचनाद्याः ॥ ८ । १ । ३३ ॥ इत्यनेन वा पुंवद्भावः । पक्षे कुलं, कुलाइँ कुलाइं कुलाणि

इत्यादि नपुंसके । एवं छन्दस्शब्दस्य, छन्दो, छन्दं माहात्म्यशब्दस्य माहप्पो माहप्पं । इत्यादि

## ॥ अथ यशस्शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | जसो | जसा |
| **द्वितीया** | जसं | जसे जसा |

इत्यादि ॥ आदेर्यो जः- ॥ ८ । १ । २४५ ॥ इत्यनेन जः । पयस्शब्दस्य पओ । तेजसः तेओ । तमसः तमो । उरसः उरो । वक्षस्शब्दस्य तु वच्छो इत्यादि देववत् ।

## ॥ अथ जन्मन्शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | जम्मो | जम्मा |
| **द्वितीया** | जम्मं | जम्मे जम्मा |

इत्यादि ॥ न्मो मः ॥ ८ । २ । ६१ ॥ इत्यनेन न्मस्य मः । एवं नर्मन्मर्मन्वर्मन् प्रभृतयः । यच्च सेयं, वयं, सुमणं, सम्मं, चम्ममिति दृश्यते तद्बहुलाधिकारात् ।

स्नमदामशिरोनभः ॥ ८ । १ । ३२ ॥ इत्यनेन पुंवद्भावः

**॥ अथ गुणशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | गुणो | गुणा |
| **द्वितीया** | गुणं | गुणे गुणा |

इत्यादि । गुणाद्याः क्लीबे वा ॥ ८ । १ । ३४ ॥ प्रयोक्तव्या इत्यर्थः । नपुंसके तु । गुणं गुणाइँ गुणाइं गुणाणि । इत्यादि ।

**॥ अथ स्नेहशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | सणेहो नेहो | सणेहा नेहा |

इत्यादि ॥ स्नेहाग्न्योर्वा ॥ ८ । २ । १०२ ॥ अनयोः संयुक्तस्यान्त्यव्यञ्जनात्पूर्वोऽकारो वा भवति ।

**॥ अथ निकषशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | निहसो | निहसा |
| **द्वितीया** | निहसं | निहसे निहसा |

इत्यादि

**॥ अथ स्फटिकशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | फलिहो | फलिहा |
| **द्वितीया** | फलिहं | फलिहे फलिहा |

इत्यादि

## ॥ अथ चिकुरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | चिहुरो | चिहुरा |
| **द्वितीया** | चिहुरं | चिहुरे चिहुरा |

इत्यादि ॥ निकष-स्फटिक-चिकुरे हः ॥ ८ । १ । १८६ ॥ इत्यनेन कस्य हकारः। स्फटिकशब्दे तु ॥ स्फटिके लः ॥ ८ । १ । १९७ ॥ इत्यनेन टकारस्य लकारः ।

## ॥ अथ कदम्बशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | कलम्बो कलंबो | कलम्बा कलंबा |

इत्यादि ॥ कदम्बे वा ॥ ८ । १ । २२२ ॥ इत्यनेन दस्य वा लकारः । पक्षे । कयंबो कयंबा इत्यादि ।

## ॥ अथ प्रश्नशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पण्हो | पण्हा |
| **द्वितीया** | पण्हं | पण्हे पण्हा |

इत्यादि

## ॥ अथ शिश्नशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सिण्हो | सिण्हा |
| **द्वितीया** | सिण्हं | सिण्हे सिण्हा |

इत्यादि ॥ सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां-ण्हः- ॥ ८ । २ । ७५ ॥ इत्यनेन श्नस्य स्थाने णकाराक्रान्तो हकारो भवति ।

## ॥ अथ स्वप्नशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सिविणो सिमिणो | सिविणा सिमिणा |
| द्वितीया | सिविणं सिमिणं | सिविणे सिविणा<br>सिमिणे सिमिणा |

इत्यादि ॥ इः स्वप्नादौ ॥ ८ । १ । ४६ ॥ इत्यनेनादेरकारस्ये-त्वम् ॥ स्वप्ने नात् ॥ ८ । २ । १०८ ॥ इत्यनेन स्वप्न शब्दे नकारात्पूर्व इकारः । स्वप्ननीव्योर्वा ॥ ८ । १ । २५९ ॥ इत्यनेन वकारस्य वा मकारः । आर्षे उकारोऽपि । यथा । सुमिणो, सुमिणा, इत्यादि ।

## ॥ अथ वेतसशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वेडिसो | वेडिसा |
| द्वितीया | वेडिसं | वेडिसे वेडिसा |

इत्यादि ॥ इत्वे वेतसे ॥ ८ । १ । २०७ ॥ इत्यनेन तस्य डकारः । इत्वाभावे तु । वेअसो वेअसा इत्यादि ।

## ॥ अथ मृदङ्गशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मिइङ्गो मुइङ्गो | मिइङ्गा मुइङ्गा |

इत्यादि

## ॥ अथ नप्तृकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | नत्तिओ नत्तुओ | नत्तिआ नत्तुआ |

इत्यादि ॥ इदुतौ वृष्ट-वृष्टि-पृथङ्-मृदङ्ग-नप्तृके ॥ ८ । १ । १३७ ॥ इत्यनेन ऋकारस्येकारोकारौ भवतः ।

**॥ अथ वृष्टशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | विट्ठो वुट्ठो | विट्ठा वुट्ठा |

इत्यादि

**॥ अथ कृपणशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | किविणो | किविणा |
| **द्वितीया** | किविणं | किविणे किविणा |

इत्यादि । इत्कृपादौ ॥ ८ । १ । १२८ ॥ इत्यनेन ऋकारस्येकारः ।

**॥ अथोत्तम-शब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | उत्तिमो | उत्तिमा |
| **द्वितीया** | उत्तिमं | उत्तिमे उत्तिमा |

इत्यादि । उत्तमो उत्तमा इत्यपि भवति ।

**॥ अथ देवदत्तशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | देवदिण्णो | देवदिण्णा |
| **द्वितीया** | देवदिण्णं | देवदिण्णे देवदिण्णा |

इत्यादि । बहुलाधिकाराण्णत्वाभावे न भवतीकारः दत्तं । देवदत्तो ।

पंचाशत्-पंचदश-दत्ते ॥ ८ । २ । ४३ ॥ एषु संयुक्तेषु णकारः । पण्णासा । पण्णरह । दिण्णं ।

## ॥ अथाङ्गार -शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | इङ्गालो अङ्गारो | इङ्गाला अङ्गारा |

इत्यादि ॥ पक्वाङ्गारललाटे वा ॥ ८ । १ । ४७ ॥ इत्यनेनादेरत इत्वं वा ॥ हरिद्रादौ लः ॥ ८ । १ । २५४ ॥ इत्यनेन लकारः ।

## ॥ अथ मध्यमशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | मज्झिमो | मज्झिमा |
| **द्वितीया** | मज्झिमं | मज्झिमे मज्झिमा |

इत्यादि ॥ मध्यम-कतमे द्वितीयस्य ॥ ८ । १ । ४८ ॥ इत्यनेन द्वितीयस्यात इत्वं वा ।

## ॥ अथ विषमयशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | विसमइओ | विसमइआ |
| **द्वितीया** | विसमइअं | विसमइए विसमइआ |

इत्यादि ॥ मयट्यइर्वा ॥ ८ । १ । ५० ॥ मयटि प्रत्यये आदेरतः स्थाने अइ इत्यादेशः । पक्षे । विसमओ विसमआ इत्यादि ।

## ॥ अथ हरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | हीरो हरो | हीरा हरा |
| **द्वितीया** | हीरं हरं | हीरे हीरा<br>हरे हरा |

इत्यादि ॥ ईर्हरे वा ॥ ८ । १ । ५१ ॥ इत्यनेनादेरत ईर्वा ।

**॥ अथ खण्डितशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | खुडिओ खण्डिओ | खुडिआ खण्डिआ |

इत्यादि ॥ वन्द्र-खण्डिते णा वा ॥ ८ । १ । ५३ ॥ इत्यनेनादेरकारस्य णकारेण सहितस्योत्वं वा भवति ।

**॥ अथ प्रथमशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पुढुमो पुढमो<br>पढुमो पढमो | पुढुमा पुढमा<br>पढुमा पढमा |

इत्यादि ॥ प्रथमे पथोर्वा ॥ ८ । १ । ५५ ॥ इत्यनेन प्रथमशब्दे पकारथकारयोरकारस्य युगपत् क्रमेण च उकारो वा भवति ।

॥ मेथि-शिथिर-शिथिल-प्रथमे थस्य ढः ॥ ८ । १ । २१५ ॥ इत्यनेन थस्य ढः ।

**॥ अथ गवयशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | गउओ | गउआ |
| **द्वितीया** | गउअं | गउए गउआ |

इत्यादि ॥ गवये वः ॥ ८ । १ । ५४ ॥ इत्यनेन वकाराकारस्योकारः ।

**॥ अथ प्राज्ञशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पज्जो | पज्जा |
| **द्वितीया** | पज्जं | पज्जे पज्जा |

इत्यादि ॥ ज्ञो ञः ॥ ८ । २ । ८३ ॥ इत्यनेन ज्ञः सम्बन्धिनो ञस्य वा लुक्, पक्षे ॥ म्न-ज्ञोर्णः ॥ ८ । २ । ४२ ॥ इत्यनेन ज्ञस्य णकारे कृते । पण्णो पण्णा इत्यादि ।

**॥ अथ प्रज्ञशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पज्जो पण्णो | पज्जा पण्णा |

इत्यादि

**॥ अथोत्कर-शब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | उक्केरो उक्करो | उक्केरा उक्करा |
| **द्वितीया** | उक्केरं उक्करं | उक्केरे उक्करे<br>उक्केरा उक्करा |

इत्यादि ॥ वल्ल्युत्करपर्यन्ताश्चर्ये वा ॥ ८ । १ । ५८ ॥ इत्यनेनादेरस्य एत्वं वा ।

**॥ अथ पर्यन्तशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पेरंतो पज्जंतो | पेरंता पज्जंता |

इत्यादि ॥ एतः पर्यन्ते ॥ ८ । २ । ६५ ॥ इत्यनेन पर्यन्तशब्दे र्यस्य रो भवति एत्वे कृते सति ॥ द्य-य्य-र्यां जः ॥ ८ । २ । २४ ॥ इत्यनेन एत्वाभावपक्षे जकारः ।

## ॥ अथ चामरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | चमरो चामरो | चमरा चामरा |
| द्वितीया | चमरं चामरं | चमरे चामरे<br>चमरा चामरा |

इत्यादि

## ॥ अथ कालकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कलओ कालओ | कलआ कालआ |

इत्यादि

## ॥ अथ स्थापितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | ठविओ ठाविओ | ठविआ ठाविआ |

इत्यादि

## ॥ अथ परिस्थापितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | परिट्ठविओ परिट्ठाविओ | परिट्ठविआ परिट्ठाविआ |

इत्यादि

## ॥ अथ संस्थापितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | संठविओ संठाविओ | संठविआ संठाविआ |

इत्यादि

**॥ अथ हालिकशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | हलिओ हालिओ | हलिआ हालिआ |

इत्यादि

**॥ अथ नाराचशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | नराओ नाराओ | नराआ नाराआ |

इत्यादि

**॥ अथ कुमारशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | कुमरो कुमारो | कुमरा कुमारा |

इत्यादि ॥ वाव्ययोत्खातादावदातः ॥ ८ । १ । ६७ ॥ इत्यनेनादेराकारस्य अद्वा भवति । केचित् ब्राह्मणपूर्वाह्णयोरपीच्छन्ति । बम्हणो, बाम्हणो । पुव्वण्हो, पुव्वाण्हो, इत्यादि, बम्हणो, बाम्हणो, इत्यत्र तु ॥ पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः ॥ ८ । २ । ७४ ॥ इत्यनेन ह्मस्य म्हः । क्वचिच्च बम्भणो इत्यपि भवति । सिद्धान्ते माहणो इत्यपि भवति । यथा । उसभदत्तस्स माहणस्स ।

**॥ अथ ग्रीष्मशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | गिम्हो | गिम्हा |
| **द्वितीया** | गिम्हं | गिम्हे गिम्हा |

इत्यादि

## ॥ अथ कुश्मानशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कुम्हाणो | कुम्हाणा |
| द्वितीया | कुम्हाणं | कुम्हाणे कुम्हाणा |

इत्यादि

## ॥ अथ विस्मयशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | विम्हओ | विम्हआ |
| द्वितीया | विम्हअं | विम्हए विम्हआ |

इत्यादि

## ॥ अथ प्रवाहशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पवहो पवाहो | पवहा पवाहा |
| द्वितीया | पवहं पवाहं | पवहे पवाहे<br>पवहा पवाहा |

इत्यादि

## ॥ अथ प्रहारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पहरो पहारो | पहरा पहारा |
| द्वितीया | पहरं पहारं | पहरे पहारे<br>पहरा पहारा |

इत्यादि

## ॥ अथ प्रकारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पयरो पयारो | पयरा पयारा |

इत्यादि । एवं प्रचारशब्दस्यापि रूपाणि ।

## ॥ अथ प्रस्तावशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पत्थवो पत्थावो | पत्थवा पत्थावा |
| **द्वितीया** | पत्थवं पत्थावं | पत्थवे पत्थावे<br>पत्थवा पत्थावा |

इत्यादि ॥ घञ्वृद्धेर्वा ॥ ८ । १ । ६८ ॥ घञ्निमित्तो यो वृद्धिरूप आकारस्तस्यादिभूतस्य अद्वा भवति । क्वचिन्न । रागः । राओ ।

## ॥ अथ महाराष्ट्रशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | मरहट्टो मराहट्टो | मरहट्टा मराहट्टा |
| **द्वितीया** | मरहट्टं मराहट्टं | मरहट्टे मराहट्टे<br>मरहट्टा मराहट्टा |

इत्यादि ॥ महाराष्ट्रे ॥ ८ । १ । ६९ ॥ इत्यनेनादेराकारस्य अद्वा भवति ॥ महाराष्ट्रे हरोः ॥ ८ । २ । ११९ ॥ इत्यनेन महाराष्ट्रशब्दे हरोर्व्यत्ययः ।

## ॥ अथ पांसनशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पंसणो | पंसणा |
| **द्वितीया** | पंसणं | पंसणे पंसणा |

इत्यादि

## ॥ अथ कांसिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कंसिओ | कंसिआ |
| द्वितीया | कंसिअं | कंसिए कंसिआ |

इत्यादि

## ॥ अथ वांशिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वंसिओ | वंसिआ |

इत्यादि

## ॥ अथ पाण्डवशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पंडवो | पंडवा |

इत्यादि

## ॥ अथ सांसिद्धिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | संसिद्धिओ | संसिद्धिआ |

इत्यादि

## ॥ अथ सांयात्रिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | संजत्तिओ | संजत्तिआ |

इत्यादि ॥ मांसादिष्वनुस्वारे ॥ ८ । १ । ७० ॥ इत्यनेना-देरातोऽद्भवति । संजत्तिओ, इत्यत्र द्वितीयाऽऽकारस्य तु, ह्रस्वः संयोगे, इति ह्रस्वः ।

## ॥ अथ श्यामाकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सामओ | सामआ |
| द्वितीया | सामअं | सामए सामआ |

इत्यादि ॥ श्यामाके मः ॥ ८ । १ । ७१ ॥ इत्यनेन मस्य आतोऽकारः ।

## ॥ अथ कूर्पासशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कुप्पिसो कुप्पासो | कुप्पिसा कुप्पासा |

इत्यादि ॥ इः सदादौ वा ॥ ८ । १ । ७२ ॥ इत्यनेनात इत्वं वा ।

## ॥ अथ खल्वाटशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | खल्लीडो | खल्लीडा |
| द्वितीया | खल्लीडं | खल्लीडे खल्लीडा |

इत्यादि ॥ ईः स्त्यान-खल्वाटे ॥ ८ । १ । ७४ । इत्यनेनात इत्वं ॥ टोडः ॥ ८ । १ । १९५ ॥ इत्यनेन टकारस्य डकारः ।

## ॥ अथ स्तावकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | थुवओ | थुवआ |
| द्वितीया | थुवअं | थुवए थुवआ |

इत्यादि ॥ उः सास्ना-स्तावके ॥ ८ । १ । ७५ ॥ इत्यनेनात उत्वं ।

## ॥ अथाऽऽसारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | ऊसारो आसारो | ऊसारा आसारा |
| द्वितीया | ऊसारं आसारं | ऊसारे ऊसारा<br>आसारे आसारा |

इत्यादि ॥ ऊद्वासारे ॥ ८ । १ । ७६ ॥ इत्यनेनात ऊत्वं वा ।

## ॥ अथ नैरयिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | नेरइओ | नेरइआ |
| द्वितीया | नेरइअं | नेरइए नेरइआ |

इत्यादि

## ॥ अथैरावण-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | एरावणो | एरावणा |
| द्वितीया | एरावणं | एरावणे एरावणा |

इत्यादि

## ॥ अथ कैलासशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कइलासो | कइलासा |
| द्वितीया | कइलासं | कइलासे कइलासा |

इत्यादि ॥ वैरादौ वा ॥ ८ । १ । १५२ ॥ इत्यनेन अइरादेशः । पक्षे । केलासो, केलासा । इत्यादि ।

## ॥ अथ कैटभशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | केढवो | केढवा |
| **द्वितीया** | केढवं | केढवे केढवा |

इत्यादि ॥ सटा-शकट-कैटभे ढः ॥ ८ । १ । १९६ ॥ इत्यनेन टस्य ढः ॥ कैटभे भो वः ॥ ८ । १ । २४० ॥ इत्यनेन भस्य वकारः ।

## ॥ अथ वैकुण्ठशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | वेकुण्ठो | वेकुण्ठा |
| **द्वितीया** | वेकुण्ठं | वेकुण्ठे वेकुण्ठा |

इत्यादि । एवमैरावतादयः ॥ ऐत एत् ॥ ८ । १ । १४८ ॥ इत्यनेन सर्वत्र एकारः ।

## ॥ अथ पारापतशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | पारेवओ पारावओ | पारेवआ पारावआ |
| **द्वितीया** | पारेवअं पारावअं | पारेवए पारावए<br>पारेवआ पारावआ |

इत्यादि ॥ पारापते रो वा ॥ ८ । १ । ८० ॥ इत्यनेन रकारस्थितस्य आत एद्वा भवति ।

## ॥ अथ चूर्णशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | चुण्णो | चुण्णा |
| **द्वितीया** | चुण्णं | चुण्णे चुण्णा |

इत्यादि

**॥ अथ नरेन्द्रशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | नरिन्दो | नरिन्दा |
| द्वितीया | नरिन्दं | नरिन्दे नरिन्दा |

इत्यादि

**॥ अथ मुनीन्द्रशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मुणिन्दो | मुणिन्दा |

इत्यादि

॥ ह्रस्वः संयोगे ॥ इत्यनेन ह्रस्वः ।

**॥ अथोत्सव-शब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | उच्छवो ऊसवो | उच्छवा ऊसवा |

इत्यादि

**॥ अथोत्सुक-शब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | उच्छुओ ऊसुओ | उच्छुआ ऊसुआ |

इत्यादि ॥ सामर्थ्योत्सुकोत्सवे वा ॥ ८ । २ । २२ ॥ इत्यनेन छकारे कृते ॥ अनुत्साहोत्सन्ने त्सच्छे ॥ ८ । १ । ११४ ॥ इत्यनेनोत्साहोत्सन्नवर्जिते शब्दे यौ त्सच्छौ तयोः परयोरादेरुत ऊद्भवति ।

॥ अथोत्सिक्त-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | ऊसित्तो | ऊसित्ता |
| द्वितीया | ऊसित्तं | ऊसित्ते ऊसित्ता |

इत्यादि

॥ अथोत्साह-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | उत्थारो उच्छाहो | उत्थारा उच्छाहा |

इत्यादि ॥ वोत्साहे थो हश्च रः ॥ ८ । २ । ४८ ॥ ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले ॥ ८ । २ । २१ ॥ इत्यनेन सूत्रेण उत्साहशब्दे त्स इत्यस्य छकारः ।

॥ अथोत्सन्न-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | उच्छन्नो | उच्छन्ना |
| द्वितीया | उच्छन्नं | उच्छन्ने उच्छन्ना |

इत्यादि

॥ अथ मत्सरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मच्छलो मच्छरो | मच्छला मच्छरा |

इत्यादि

॥ अथ संवत्सरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | संवच्छलो संवच्छरो | संवच्छला संवच्छरा |

इत्यादि

## ॥ अथ निश्चलशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | णिच्चलो | णिच्चला |

इत्यादि

## ॥ अथ मूषिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मूसगो मूसओ | मूसगा मूसआ |

इत्यादि

## ॥ अथ बिभीतकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | बहेडओ | बहेडआ |
| द्वितीया | बहेडअं | बहेडए बहेडआ |

इत्यादि ॥ पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीत-केष्वत् ॥ ८ । १ । ८८ ॥ इत्यनेनादेरित अकारः । बहेडओ इत्यत्र ॥ एत्पीयूषापीडबिभीतककीदृशेदृशे ॥ ८ । १ । १०५ ॥ इत्यनेन ईत एकारः ।

## ॥ अथ निर्णयशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | निण्णओ | निण्णआ |
| द्वितीया | निण्णअं | निण्णए निण्णआ |

इत्यादि

## ॥ अथ द्विमात्रशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दुमत्तो | दुमत्ता |
| द्वितीया | दुमत्तं | दुमत्ते दुमत्ता |

इत्यादि

## ॥ अथ द्विविधशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दुविहो | दुविहा |
| द्वितीया | दुविहं | दुविहे दुविहा |

इत्यादि

## ॥ अथ द्विरेफशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दुरेहो | दुरेहा |
| द्वितीया | दुरेहं | दुरेहे दुरेहा |

इत्यादि ॥ द्विन्योरुत् ॥ ८ । १ । ९४ ॥ इत्यनेन द्विशब्दे इत उद्भवति । बहुलाधिकारात् क्वचिद्विकल्पः । दुउणो । बिउणो । दुउणा । बिउणा द्विगुण इत्यर्थः । दुइओ । बिइओ । दुइज्जो । बीओ । इत्यादि । द्वितीय इत्यर्थः । क्वचिन्न भवति । दिओ । दिआ । इत्यादि । द्विज इत्यर्थः । दिरओ । दिरआ । इत्यादि । द्विरद इत्यर्थः ।

## ॥ अथ निषण्ण शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | णुमण्णो णिसण्णो | णुमण्णा णिसण्णा |
| द्वितीया | णुमण्णं णिसण्णं | णुमण्णे णिसण्णे<br>णुमण्णा णिसण्णा |

इत्यादि ॥ उमो निषण्णे ॥ ८ । १ । १७४ ॥ इत्यनेनादेः स्वरस्य परेण सस्वरव्यञ्जनेन सह उम आदेशो वा भवति ।

## ॥ अथ युधिष्ठिरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | जहुट्ठिलो जहिट्ठिलो | जहुट्ठिला जहिट्ठिला |

इत्यादि ॥ युधिष्ठिरे वा ॥ ८ । १ । ९६ ॥ इत्यनेनादेरित उत्वं वा । पक्षे ॥ इतो मुकुलादिष्वत् ॥ ८ । १ । १०७ ॥ इत्यनेनादेरुतोऽकारः ॥ हरिद्रादौ लः ॥ ८ । १ । २५४ ॥ इत्यनेन लकारः ।

## ॥ अथ निर्झरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | ओज्झरो निज्झरो | ओज्झरा निज्झरा |

इत्यादि ॥ वा निर्झरे ना ॥ ८ । १ । ९८ ॥ इत्यनेन निर्झरशब्दे नकारेण सह इत ओकारो वा भवति । निर्जरशब्दस्य तु निज्जरो, इत्येकमेव भवति ।

## ॥ अथ कश्मीरशब्दः ॥

| | बहुवचनम् | |
|---|---|---|
| **प्रथमा** | कम्भारा | कम्हारा |

इत्यादि, देवशब्दस्य बहुवचनवत् ॥ कश्मीरे म्भो वा ॥ ८ । २ । ६० ॥ इत्यनेन संयुक्तस्य म्भः । आत्कश्मीरे ॥ ८ । १ । १०० ॥ इत्यनेन ईत आकारः । पक्षे ॥ पक्ष्म-श्म-ष्मेत्यादिना सूत्रेण श्मस्य म्हः । कश्मीरशब्दस्य देशवाचित्वात्, बहुवचनान्त एव दृश्यते । कम्भारो, कम्हारो इति तु प्रत्यन्तराल्लभ्यते ।

## ॥ अथ व्यापातशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | वावाओ | वावाआ |
| **द्वितीया** | वावाअं | वावाए वावाआ |

इत्यादि ॥ अधो मनयाम् ॥ इत्यनेन यकारस्य लुक् । विउवाओ । विउवाआ । इति तु आर्षप्रयोगः ।

## ॥ अथ स्तोकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | थोक्को थोवो थेवो | थोक्का थोवा थेवा |

इत्यादि ॥ स्तोकस्य थोक्क-थोव-थेवाः ॥ ८ । २ । १२५ ॥ एते त्रय आदेशा वा भवन्ति । पक्षे । थोओ थोआ इत्यादि ।

## ॥ अथ करीषशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | करिसो | करिसा |
| **द्वितीया** | करिसं | करिसे करिसा |

इत्यादि

## ॥ अथ शिरीषशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सिरिसो | सिरिसा |
| **द्वितीया** | सिरिसं | सिरिसे सिरिसा |

इत्यादि

## ॥ अथ वल्मीकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | वम्मिओ | वम्मिआ |
| **द्वितीया** | वम्मिअं | वम्मिए वम्मिआ |

इत्यादि

## ॥ अथ व्रीडितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | विलिओ | विलिआ |
| **द्वितीया** | विलिअं | विलिए विलिआ |

इत्यादि ॥ डो लः ॥ ८ । १ । २०२ ॥ इत्यनेन डकारस्य लकारः ।

## ॥ अथोपनीत-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | उवणिओ | उवणिआ |
| **द्वितीया** | उवणिअं | उवणिए उवणिआ |

इत्यादि ॥ पानीयादिष्वित् ॥ ८ । १ । १०१ ॥ इत्यनेन ईत इत्वम् । बहुलाधिकारादेषु क्वचिन्नित्यं क्वचिद्विकल्पः । करीसो । उवणीओ । इत्यादि ।

## ॥ अथ गरुडशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | गरुलो | गरुला |
| **द्वितीया** | गरुलं | गरुले गरुला |

इत्यादि ॥ डो लः ॥ ८ । १ । २०२ ॥ इत्यनेन लः । अस्मिन् सूत्रे प्रायोग्रहणात् क्वचिद्विकल्पः । यथा गुलो, गुडो । आमेलो, आवेडो । इत्यादि ॥ नीपापीडे मो वा ॥ ८ । १ । २३४ ॥ इत्यनेन पस्य मः ॥ एत्पीयूषापीड-बिभीतक-कीदृशेदृशे ॥ ८ । १ । १०५ ॥ इत्यनेन एकारः । क्वचिन्न लकारः । गउडो, गउडा, इत्यादि । गौडशब्दस्य गउडो इति रूपम् ।

**॥ अथ पौरशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | पउरो | पउरा |
| **द्वितीया** | पउरं | पउरे पउरा |

इत्यादि

**॥ अथ कौरवशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | कउरवो | कउरवा |
| **द्वितीया** | कउरवं | कउरवे कउरवा |

इत्यादि

**॥ अथ पौरजनशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | पउरजणो | पउरजणा |
| **द्वितीया** | पउरजणं | पउरजणे पउरजणा |

इत्यादि ॥ अउः पौरादौ च ॥ ८ । १ । १६२ ॥ इत्यनेन औत अउरादेशः ।

### ॥ अथ जीर्णशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | जुण्णो | जुण्णा |
| **द्वितीया** | जुण्णं | जुण्णे जुण्णा |

इत्यादि ॥ उज्जीर्णे ॥ ८ । १ । १०२ ॥ इत्यनेन ईत उकारः । बहुलाधिकारात् क्वचिन्न । जिण्णे भोअणमत्तेओ ।

### ॥ अथ हीनशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | हूणो हीणो | हूणा हीणा |
| **द्वितीया** | हूणं हीणं | हूणे हीणे / हूणा हीणा |

इत्यादि ॥ ऊर्हीनविहीने वा ॥ ८ । १ । १०३ ॥ इत्यनेन ईत ऊत्वम् । एवं विहीनशब्दस्यापि । सूत्रे हीन-विहीने, इति प्रतिपादनात्, पहीणजरमरणा इत्यत्र न भवत्यूकारः ।

### ॥ अथ कीदृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | केरिसो | केरिसा |
| **द्वितीया** | केरिसं | केरिसे केरिसा |

इत्यादि

### ॥ अथेदृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | एरिसो | एरिसा |
| **द्वितीया** | एरिसं | एरिसे एरिसा |

इत्यादि ॥ दृशः क्विप्टक्सकः ॥ ८ । १ । १४२ ॥ इत्यनेन दृशेर्धातोर्ऋतोरिरादेशः ।

## ॥ अथ सदृग्वर्ण शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सरिवण्णो | सरिवण्णा |
| द्वितीया | सरिवण्णं | सरिवण्णे सरिवण्णा |

इत्यादि

## ॥ अथ सदृग्रूपशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सरिरूवो | सरिरूवा |
| द्वितीया | सरिरूवं | सरिरूवे सरिरूवा |

इत्यादि

## ॥ अथ सदृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सरिसो | सरिसा |
| द्वितीया | सरिसं | सरिसे सरिसा |

इत्यादि

## ॥ अथैतादृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | एआरिसो | एआरिसा |
| द्वितीया | एआरिसं | एआरिसे एआरिसा |

इत्यादि

## ॥ अथ भवादृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भवारिसो | भवारिसा |
| द्वितीया | भवारिसं | भवारिसे भवारिसा |

इत्यादि

## ॥ अथ यादृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जारिसो | जारिसा |
| द्वितीया | जारिसं | जारिसे जारिसा |

इत्यादि

## ॥ अथ तादृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | तारिसो | तारिसा |
| द्वितीया | तारिसं | तारिसे तारिसा |

इत्यादि

## ॥ अथान्यादृश-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अन्नारिसो | अन्नारिसा |
| द्वितीया | अन्नारिसं | अन्नारिसे अन्नारिसा |

इत्यादि

## ॥ अथ मादृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मारिसो | मारिसा |
| द्वितीया | मारिसं | मारिसे मारिसा |

इत्यादि

## ॥ अथ युष्मादृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | जुम्हारिसो | जुम्हारिसा |
| **द्वितीया** | जुम्हारिसं | जुम्हारिसे जुम्हारिसा |

इत्यादि ॥ युष्मद्यर्थपरे तः ॥ ८ । १ । २४६ ॥ इत्यनेन यकारस्य तकारः ।

## ॥ अथास्मादृश-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | अम्हारिसो | अम्हारिसा |
| **द्वितीया** | अम्हारिसं | अम्हारिसे अम्हारिसा |

इत्यादि ॥ पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः ॥ ८ । २ । ७४ ॥ इत्यनेन म्हः ।

## ॥ अथ मुकुलशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | मउलो | मउला |
| **द्वितीया** | मउलं | मउले मउला |

इत्यादि

## ॥ अथ मुकुटशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | मउडो | मउडा |
| **द्वितीया** | मउडं | मउडे मउडा |

इत्यादि

## ॥ अथ मुकुरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मउरो | मउरा |
| द्वितीया | मउरं | मउरे मउरा |

इत्यादि । उतो मुकुलादिष्वत् ॥ ८ । १ । १०७ ॥ इत्यनेनादेरुतोऽत्वम् । क्वचिदाकारोपि । विद्रुतः । विद्दाओ विद्दाआ इत्यादि ।

## ॥ अथ गुरुकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | गरुओ गुरुओ | गरुआ गुरुआ |
| द्वितीया | गरुअं गुरुअं | गरुए गरुआ<br>गुरुए गुरुआ |

इत्यादि ॥ गुरौ के वा ॥ ८ । १ । १०९ ॥ इत्यनेन गुरोः स्वार्थे के सति आदेरुतोऽद्वा भवति ।

## ॥ अथ सुभगशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सूहवो सुहओ | सूहवा सुहआ |
| द्वितीया | सूहवं सुहअं | सूहवे सूहवा<br>सुहए सुहआ |

इत्यादि ॥ ऊत्सुभगमुसले वा ॥ ८ । १ । ११३ ॥ इत्यनेनादेरुत ऊद्वा ॥ ऊत्वे दुर्भग-सुभगे वः ॥ ८ । १ । १९२ ॥ अनयोरूत्वे गस्य वः ।

## ॥ अथ दुर्भगशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दूहवो दुहओ | दूहवा दुहआ |

इत्यादि ॥ लुंकि दुरो वा ॥ ८ । १ । ११५ ॥ इत्यनेन रेफस्य लुकि सति उत ऊत्वं वा भवति ।

## ॥ अथ लुब्धकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | लोद्धओ | लोद्धआ |
| द्वितीया | लोद्धअं | लोद्धए लोद्धआ |

इत्यादि

## ॥ अथ मुद्गरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मोग्गरो | मोग्गरा |

इत्यादि

## ॥ अथ कुन्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कोन्तो | कोन्ता |
| द्वितीया | कोन्तं | कोन्ते कोन्ता |

इत्यादि

## ॥ अथ पुस्तकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पोत्थओ | पोत्थआ |
| द्वितीया | पोत्थअं | पोत्थए पोत्थआ |

इत्यादि ॥ ओत्संयोगे ॥ ८ । १ । ११६ ॥ इत्यनेनादेरुत ओत्वम् । ह्रस्वः संयोगे ॥ इत्यनेन ह्रस्वे कृते तु । लुद्धओ । मुग्गरो । कुन्तो । पुत्थओ । इत्यादि । पोत्थओ, इत्यत्र तु ॥ वाक्ष्यर्थवचनाद्याः ॥ इत्यनेन वा पुंवद्भावः । पक्षे कुलवद्रूपाणि ।

## ॥ अथार्हच्छब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | अरुहन्तो अरहन्तो अरिहन्तो | अरुहन्ता अरहन्ता अरिहन्ता |

इत्यादि देववत् । उच्चार्हति ॥ ८ । २ । १११ ॥ इत्यनेनार्हच्छब्दे संयुक्तस्यान्त्यव्यञ्जनात्पूर्व उकाराऽकारेकाराः स्युः । कृतेषु च तेषु ॥ शत्रानशः ॥ ८ । ३ । १८१ ॥ इत्यनेन न्त इत्यादेशः ।

## ॥ अथ हनूमच्छब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | हणुमन्तो | हणुमन्ता |
| **द्वितीया** | हणुमन्तं | हणुमन्ते हणुमन्ता |

इत्यादि ॥ आल्विल्लोल्लाल-वन्त-मन्तेत्तेर-मणा मतोः ॥ ८ । २ । १५९ ॥ इत्यनेन मतोर्मन्त इत्यादेशः ॥ उर्भ्रूहनूमत्कण्डूयवातूले ॥ ८ । १ । १२१ । इत्यनेन ऊत उत्वम् । केचिन्मादेशमपीच्छन्ति । यथा । हणुमा । इत्यादिस्त्रीलिङ्गे मालावत् ।

## ॥ अथ पथिन्शब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | पहो | पहा |
| **द्वितीया** | पहं | पहे पहा |

इत्यादि ॥ पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत् ॥ ८ । १ । ८८ ॥ इत्यनेनादेरितोऽकारः ।

## ॥ अथ मृगशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | मओ | मआ |
| **द्वितीया** | मअं | मए मआ |

इत्यादि

## ॥ अथ घृष्टशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | घट्ठो | घट्ठा |

इत्यादि ॥ ऋतोऽत् ॥ ८ । १ । १२६ ॥ इत्यनेनाऽकारः

## ॥ अथ भृङ्गशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | भिङ्गो | भिङ्गा |
| **द्वितीया** | भिङ्गं | भिङ्गे भिङ्गा |

इत्यादि

## ॥ अथ शृङ्गारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सिङ्गारो | सिङ्गारा |

इत्यादि

## ॥ अथ भृङ्गारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | भिङ्गारो | भिङ्गारा |

इत्यादि

## ॥ अथ शृगालशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सिआलो सिगालो | सिआला सिगाला |

इत्यादि

## ॥ अथ कृशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | किसो | किसा |
| द्वितीया | किसं | किसे किसा |

इत्यादि

## ॥ अथ कृषितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | किसिओ | किसिआ |
| द्वितीया | किसिअं | किसिए किसिआ |

इत्यादि

## ॥ अथ नृपशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | निवो | निवा |
| द्वितीया | निवं | निवे निवा |

इत्यादि

## ॥ अथ कृपशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | किवो | किवा |

इत्यादि

### ॥ अथ तृप्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | तिप्पो | तिप्पा |
| द्वितीया | तिप्पं | तिप्पे तिप्पा |

इत्यादि

### ॥ अथ हृतशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | हिओ | हिआ |

इत्यादि

### ॥ अथ व्याहृतशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वाहित्तो वाहिओ | वाहित्ता वाहिआ |

इत्यादि ॥ सेवादौ वा ॥ ८ । २ । ९९ ॥ इत्यनेन वा द्वित्वम् ।

### ॥ अथ दृष्टशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दिट्ठो | दिट्ठा |
| द्वितीया | दिट्ठं | दिट्ठे दिट्ठा |

इत्यादि

### ॥ अथ बृंहितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | बिंहिओ | बिंहिआ |
| द्वितीया | बिंहिअं | बिंहिए बिंहिआ |

इत्यादि

## ॥ अथ वितृष्णशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | विइण्हो | विइण्हा |
| **द्वितीया** | विइण्हं | विइण्हे विइण्हा |

इत्यादि ॥ सूक्ष्म-श्नेत्यादिना-ष्णस्थाने ण्हः ।

## ॥ अथोत्कृष्ट-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | उक्किट्ठो | उक्किट्ठा |
| **द्वितीया** | उक्किट्ठं | उक्किट्ठे उक्किट्ठा |

इत्यादि

## ॥ अथ नृशंसशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | निसंसो | निसंसा |
| **द्वितीया** | निसंसं | निसंसे निसंसा |

इत्यादि ॥ इत् कृपादौ ॥ ८ । १ । १२८ ॥ इत्यनेनादेर्ऋत इत्वम् ।

## ॥ अथ पृष्ठशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पिट्ठो पट्ठो | पिट्ठा पट्ठा |

इत्यादि ॥ पृष्ठे वानुत्तरपदे ॥ ८ । १ । १२९ ॥ इत्यनेन ऋत इद्वा ।

## ॥ अथ मृगाङ्कशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मियङ्को मयङ्को | मियङ्का मयङ्का |

इत्यादि

## ॥ अथ धृष्टशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | धिट्ठो धट्ठो | धिट्ठा धट्ठा |

इत्यादि ॥ मसृण-मृगाङ्क-मृत्यु-शृङ्ग-धृष्टे वा ॥ ८ । १ । १३० ॥ इत्यनेन ऋत इद्वा भवति । पक्षे, ऋतोऽत्, इत्यनेनाऽकारः ।

## ॥ अथ मृषावादशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मुसावाओ मूसावाओ मोसावाओ | मुसावाआ मूसावाआ मोसावाआ |

इत्यादि ॥ उदूदोन्मृषि ॥ ८ । १ । १३६ ॥ इत्यनेन सूत्रेण मृषाशब्दे ऋत उत् ऊत् ओच्च भवन्ति ।

## ॥ अथ ऋक्षशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | रिच्छो | रिच्छा |
| द्वितीया | रिच्छं | रिच्छे रिच्छा |

इत्यादि ॥ रिः केवलस्य ॥ ८ । १ । १४० ॥ इत्यनेन ऋतो रिः ।

## ॥ अथादृत-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | आढिओ | आढिआ |
| **द्वितीया** | आढिअं | आढिए आढिआ |

इत्यादि ॥ आदृते ढिः ॥ ८ । १ । १४३ ॥ इत्यनेन ऋतो ढिरादेशः ।

## ॥ अथ दृप्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | दरिओ | दरिआ |
| **द्वितीया** | दरिअं | दरिए दरिआ |

इत्यादि ॥ अरिर्दृप्ते ॥ ८ । १ । १४४ ॥ इत्यनेन दृप्तशब्दे ऋतो रिः ।

## ॥ अथ क्लृप्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | किलिन्नो | किलिन्ना |
| **द्वितीया** | किलिन्नं | किलिन्ने किलिन्ना |

इत्यादि

## ॥ अथ क्लृन्नशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | किलिन्नो | किलिन्ना |

इत्यादि ॥ लृत इलिः क्लृप्त-क्लृन्ने ॥ ८ । १ । १४५ ॥ इत्यनेन लृत इलिरादेशः ।

## ॥ अथ स्तेनशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | थूणो थेणो | थूणा थेणा |

इत्यादि ॥ ऊः स्तेने वा ॥ ८ । १ । १४७ ॥ इत्यनेन एकारस्य ऊकारः ।

## ॥ अथ शनैश्चरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सणिच्छरो | सणिच्छरा |
| द्वितीया | सणिच्छरं | सणिच्छरे सणिच्छरा |

इत्यादि ॥ इत्सैन्धवशनैश्चरे ॥ ८ । १ । १४९ ॥ इत्यनेन ऐत इत्वम् ॥ ह्रस्वात् थ्य-श्चेत्यादिना सूत्रेण श्च इत्यस्य छः ।

## ॥ अथ दैत्यशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दइच्चो | दइच्चा |
| द्वितीया | दइच्चं | दइच्चे दइच्चा |

इत्यादि

## ॥ अथ भैरवशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भइरवो | भइरवा |
| द्वितीया | भइरवं | भइरवे भइरवा |

इत्यादि

## ॥ अथ वैजवनशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वइजवणो | वइजवणा |

इत्यादि

## ॥ अथ वैदेशशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वइएसो | वइएसा |

इत्यादि

## ॥ अथ वैदेहशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वइएहो | वइएहा |

इत्यादि

## ॥ अथ वैदर्भशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वइदब्भो | वइदब्भा |

इत्यादि

## ॥ अथ वैश्वानरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वइस्साणरो | वइस्साणरा |

इत्यादि

## ॥ अथ वैशाखशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वइसाहो | वइसाहा |

इत्यादि

## ॥ अथ वैशालशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | वइसालो | वइसाला |

इत्यादि ॥ अइर्दैत्यादौ च ॥ ८ । १ । १५१ ॥ इत्यनेन ऐतः अइरादेशः । दइच्चो । इत्यत्र तु । त्योऽचैत्ये ॥ ८ । २ । १३ ॥ इत्यनेन त्य इत्यस्य चः ।

## ॥ अथ वैश्रवणशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | वइसवणो | वइसवणा |
| **द्वितीया** | वइसवणं | वइसवणे वइसवणा |

इत्यादि

## ॥ अथ वैशम्पायनशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | वइसम्पायणो | वइसम्पायणा |

इत्यादि

## ॥ अथ वैतालिकशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | वइआलिओ | वइआलिआ |

इत्यादि

## ॥ अथ चैत्रशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | चइत्तो | चइत्ता |

इत्यादि ॥ वैरादौ वा ॥ ८ । १ । १५२ ॥ इत्यनेनैतोऽइरादेशः ।

## ॥ अथ प्रकोष्ठशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पवट्ठो पउट्ठो | पवट्ठा पउट्ठा |

इत्यादि ॥ ओतोद्वान्योन्यप्रकोष्ठातोद्यशिरोवेदनामनोहरसरोरुहे क्तोश्च वः ॥ ८ । १ । १५६ ॥ एषु ओतोऽत्त्वं वा तत्सन्नियोगे च यथासंभवं ककारतकारयोर्वादेशः । अन्नन्नं, अन्नुन्नं, आवज्जं, आउज्जं, मणहरं, मणोहरं, सररुहं, सरोरुहं, इत्यादि तु नपुंसके । सिर-विअणा, सिरो-विअणा, इति तु स्त्रीलिङ्गे मालावत् । विअणा, इत्यत्र, एत इद्वा वेदना-चपेटा-देवर-केसरे ॥ ८ । १ । १४६ ॥ इत्यनेन एतः स्थाने वा इकारः । पक्षे । वेअणा, इत्यपि भवति ।

## ॥ अथ सोच्छ्वासशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सूसासो | सूसासा |

इत्यादि ॥ ऊत्सोच्छ्वासे ॥ ८ । १ । १५७ ॥ इत्यनेन सोच्छ्वासशब्दे ओत ऊद्भवति ।

## ॥ अथ कौस्तुभशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कोत्थुहो | कोत्थुहा |

इत्यादि

## ॥ अथ क्रौञ्चशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कोञ्चो | कोञ्चा |

इत्यादि

## ॥ अथ कौशिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | कोसिओ | कोसिआ |

इत्यादि ॥ औत ओत् ॥ ८ । १ । १५९ ॥ इत्यनेन औत ओत्त्वम् । ह्रस्वः संयोगे, इत्यनेन ह्रस्वे कृते सति । कुत्थुहो, कुञ्चो, इत्यादि ।

## ॥ अथ मौञ्जायनशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | मुञ्जायणो | मुञ्जायणा |
| **द्वितीया** | मुञ्जायणं | मुञ्जायणे मुञ्जायणा |

इत्यादि

## ॥ अथ शौण्डशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सुण्डो | सुण्डा |
| **द्वितीया** | सुण्डं | सुण्डे सुण्डा |

इत्यादि

## ॥ अथ दौवारिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | दुवारिओ | दुवारिआ |

इत्यादि

## ॥ अथ सौवर्णिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सुवण्णिओ | सुवण्णिआ |

इत्यादि ॥ उत्सौन्दर्यादौ ॥ ८ । १ । १६० ॥ इत्यनेन औत उद्भवति ।

**॥ अथ स्थविरशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | थेरो | थेरा |
| **द्वितीया** | थेरं | थेरे थेरा |

इत्यादि

**॥ अथायस्कार-शब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | एक्कारो | एक्कारा |
| **द्वितीया** | एक्कारं | एक्कारे एक्कारा |

इत्यादि ॥ स्थविरविचकिलायस्कारे ॥ ८ । १ । १६६ ॥ इत्यनेनादेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद्भवति ।

**॥ अथ कर्णिकारशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | कण्णेरो कण्णिआरो<br>कणेरो कणिआरो | कण्णेरा कण्णिआरा<br>कणेरा कणिआरा |

इत्यादि ॥ वेतः कर्णिकारे ॥ ८ । १ । १६८ ॥ इत्यनेन सस्वरव्यञ्जनेन सह एद्वा भवति । कर्णिकारे वा ॥ ८ । २ । ९५ ॥ इत्यनेन वा द्वित्वम् ।

**॥ अथ पूतरशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पोरो | पोरा |
| **द्वितीया** | पोरं | पोरे पोरा |

इत्यादिदेववत् ॥ ओत्पूतर-बदर-नवमालिका-नवफलिका-पूगफले ॥ ८ । १ । १७० ॥ इत्यनेनादेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद्भवति ।

## ॥ अथादित्य-शब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | आइच्चो | आइच्चा |
| **द्वितीया** | आइच्चं | आइच्चे आइच्चा |

इत्यादि

## ॥ अथ स्तुत्यशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | थुच्चो | थुच्चा |

इत्यादि

## ॥ अथ त्यक्तदोषशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | चत्तदोसो | चत्तदोसा |

इत्यादि ॥ एवं मर्त्यामर्त्यप्रत्ययव्ययादयः ॥ त्योऽचैत्ये ॥ ८ । २ । १३ ॥ इत्यनेन चः ।

## ॥ अथ तीर्थंकरशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | तित्थयरो तित्थगरो तित्थकरो | तित्थयरा तित्थगरा तित्थकरा |

इत्यादि

### ॥ अथ तीर्थङ्करशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | तित्थंकरो तित्थंगरो<br>तित्थंयरो | तित्थंकरा तित्थंगरा<br>तित्थंयरा |

इत्यादि

### ॥ अथ नक्तंचरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | नक्कंचरो | नक्कंचरा |

इत्यादि

### ॥ अथ धनञ्जयशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | धणंजओ | धणंजआ |

इत्यादि

### ॥ अथार्क-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अक्को | अक्का |

इत्यादि

### ॥ अथ विप्रशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | विप्पो | विप्पा |

इत्यादि

## ॥ अथ जारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जारो | जारा |

इत्यादि

## ॥ अथ कुब्जशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | खुज्जो | खुज्जा |
| द्वितीया | खुज्जं | खुज्जे खुज्जा |

इत्यादि

## ॥ अथ कीलशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | खीलो | खीला |

इत्यादि ॥ कुब्ज-कर्पर-कीले कः खोऽपुष्पे ॥ ८ । १ । १८१ ॥ इत्यनेन कस्य खः पुष्पं चेत् कुब्जाभिधेयं न भवति कर्परशब्दस्य तु, खप्परं, इति नपुंसके ।

## ॥ अथ मदकलशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मयगलो | मयगला |

इत्यादि

## ॥ अथ कन्दुकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | गेन्दुओ | गेन्दुआ |
| द्वितीया | गेन्दुअं | गेन्दुए गेन्दुआ |

इत्यादि ॥ मरकत-मदकले गः कन्दुके त्वादेः ॥ ८ । १ । १८२ ॥ मरकत-मदकलशब्दयोः कस्य गः कन्दुकशब्दे त्वाद्यस्य कस्य । गेन्दुओ, इत्यत्र तु ॥ एच्छय्यादौ ॥ ८ । १ । ५७ ॥ इत्यनेन एकारः । मरगयं, गेन्दुअं, इति तु क्लीबे ।

**॥ अथ किरातशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | चिलाओ | चिलाआ |
| **द्वितीया** | चिलाअं | चिलाए |

इत्यादि ॥ किराते चः ॥ ८ । १ । १८३ ॥ इत्यनेन सूत्रेण ककारस्य चकारः । किरातशब्दो यदा भिल्लवाची तदायं विधिर्नान्यथा । यथा । हरकिराओ हरकिराआ इत्यादि ।

**॥ अथ मेघशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | मेहो | मेहा |
| **द्वितीया** | मेहं | मेहे मेहा |

इत्यादि

**॥ अथ माघशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | माहो | माहा |

इत्यादि

**॥ अथ बधिरशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | बहिरो | बहिरा |

इत्यादि ॥ खघथधभाम् ॥ ८ । १ । १८७ ॥ इत्यनेन हः ।

**॥ अथ अथास्थिरशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | अथिरो | अथिरा |

इत्यादि

**॥ अथ प्रणष्टभयशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पणट्ठभओ | पणट्ठभआ |

इत्यादि

**॥ अथ छागशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | छालो | छाला |
| **द्वितीया** | छालं | छाले छाला |

इत्यादि ॥ छागे लः ॥ ८ । १ । १९१ ॥ इत्यनेन गस्य लः । छाली इति तु स्त्रीलिङ्गे नदीवत् ।

**॥ अथ खचितशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | खसिओ | खसिआ |

इत्यादि

**॥ अथ पिशाचशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पिसल्लो | पिसल्ला |

इत्यादि ॥ खचित-पिशाचयोश्चः स-ल्लौ वा ॥ ८ । १ । १९३ ॥ इत्यनेन चकारस्य स-ल्लौ वा भवतः । पक्षे । खइओ पिसाओ इत्यादि ।

## ॥ अथ जटिलशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | झडिलो जडिलो | झडिला जडिला |

इत्यादि ॥ जटिले जो झो वा ॥ ८ । १ । १९४ ॥ इत्यनेन जस्य झो वा भवति ।

## ॥ अथ वडवानलशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | वलयाणलो | वलयाणला |

इत्यादि ॥ डो लः ॥ ८ । १ । २०२ ॥ इत्यनेन डस्य लः

## ॥ अथ नटशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | नडो | नडा |
| **द्वितीया** | नडं | नडे नडा |

इत्यादि

## ॥ अथ घटशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | घडो | घडा |

इत्यादि । एवं पटादयः ।

**॥ अथ शठशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | सढो | सढा |
| **द्वितीया** | सढं | सढे सढा |

इत्यादि

**॥ अथ मठशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | मढो | मढा |

इत्यादि

**॥ अथ कुठारशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | कुढारो | कुढारा |

इत्यादि

**॥ अथ कमठशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | कमढो | कमढां |

इत्यादि ॥ ठो ढः ॥ ८ । १ । १९९ ॥ इत्यनेन ठस्य ढः ।

**॥ अथ पिठरशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | पिहडो पिढरो | पिहडा पिढरा |

इत्यादि ॥ पिठरे हो वा रश्च डः ॥ ८ । १ । २०१ ॥ इत्यनेन पिठरे ठस्य हो वा तत्सन्नियोगे च रस्य डः ।

### ॥ अथ तुच्छशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | चुच्छो छुच्छो तुच्छो | चुच्छा छुच्छा तुच्छा |

इत्यादि ॥ तुच्छे तः चछौ वा ॥ ८ । १ । २०४ ॥ इत्यनेन तकारस्य चछौ वा भवतः ।

### ॥ अथ तगरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | टगरो | टगरा |

इत्यादि

### ॥ अथ त्रसरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | टसरो | टसरा |

इत्यादि

### ॥ अथ तूवरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | टूवरो | टूवरा |

इत्यादि ॥ तगर-त्रसर-तूवरे टः ॥ ८ । १ । २०५ ॥ इत्यनेन तस्य टः ।

### ॥ अथ व्यापृतशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | वावडो | वावडा |

इत्यादि

## ॥ अथ गर्भितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | गब्भिणो | गब्भिणा |

इत्यादि ॥ गर्भितातिमुक्तके णः ॥ ८ । १ । २०८ ॥ इत्यनेन तस्य णः ।

## ॥ अथ पलितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पलिलो | पलिला |

इत्यादि ॥ पलिते वा ॥ ८ । १ । २१२ ॥ इत्यनेन तस्य लकारो वा । पक्षे । पलिओ पलिआ इत्यादि । पलिलं पलिअं इति नपुंसकेऽपि ।

## ॥ अथ पीतशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पीवलो पीअलो | पीवला पीअला |

इत्यादि ॥ पीते वो ले वा ॥ ८ । १ । २१३ ॥ इत्यनेन तस्य वो वा भवति स्वार्थे लकारे परे । पक्षे । पीओ । पीआ । इत्यादि । नपुंसके तु । पीवलं, पीअलं, पीअं, इत्यादि । स्त्रियां तु । पीवला, पीअला, पीआ, इत्यादि मालावत् ।

## ॥ अथ भरतशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भरहो | भरहा |
| द्वितीया | भरहं | भरहे भरहा |

इत्यादि

### ॥ अथ कातरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | काहलो | काहला |
| **द्वितीया** | काहलं | काहले काहला |

इत्यादि ॥ वितस्ति-वसति-भरत-कातर-मातुलिङ्गे हः ॥ ८ । १ । २१४ ॥ इत्यनेन तस्य हकारः ।

### ॥ अथ शिथिरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सिढिलो | सिढिला |

इत्यादि ॥ मेथि-शिथिर-शिथिल प्रथमे थस्य ढः ॥ ८ । १ । २१५ ॥ इत्यनेन थस्य ढः । एवं शिथिलशब्दस्यापि ।

### ॥ अथ निशीथशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | णिसीढो णिसीहो | णिसीढा णिसीहा |

इत्यादि ॥ निशीथ-पृथिव्योर्वा ॥ ८ । १ । २१६ ॥ इत्यनेन थस्य वा ढः । पक्षे ॥ खघथधभाम् ॥ इत्यनेन हकारः ।

### ॥ अथ दष्टशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | डट्ठो दट्ठो डक्को दक्को | डट्ठा दट्ठा डक्का दक्का |

इत्यादि ॥ दशन-दष्ट-दग्ध-दोला-दण्ड-दर-दाह-दम्भ-दर्भ-कदन-दोहदे दो वा डः ॥ ८ । १ । २१७ ॥ इत्यनेन दस्य वा

डः ॥ शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा ॥ ८ । २ । २ ॥ इत्यनेन को वा ।

**॥ अथ दग्धशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | डड्ढो दड्ढो | डड्ढा दड्ढा |

इत्यादि ॥ एवं विदग्धादयः ॥ दग्ध-विदग्ध-वृद्धि-वृद्धे ढः ॥ ८ । २ । ४० ॥ इत्यनेन ढः । क्वचिन्न । विद्धकईनिरूविअं ।

**॥ अथ दण्डशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | डण्डो दण्डो | डण्डा दण्डा |

इत्यादि

**॥ अथ दरशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | डरो दरो | डरा दरा |

इत्यादि

**॥ अथ दाहशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | डाहो दाहो | डाहा दाहा |

इत्यादि

**॥ अथ दर्भशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | डब्भो दब्भो | डब्भा दब्भा |

इत्यादि

### ॥ अथ दम्भशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | डम्भो दम्भो | डम्भा दम्भा |

इत्यादि

### ॥ अथ दोहदशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | डोहलो दोहलो | डोहला दोहला |

इत्यादि ॥ प्रदीपि-दोहदे लः ॥ ८ । १ । २२१ ॥ इत्यनेन दस्य लः । कदनशब्दस्य तु कडणं, कदणं, इति नपुंसके ।

### ॥ अथ कदर्थितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कवट्टिओ | कवट्टिआ |

इत्यादि ॥ कदर्थिते वः ॥ ८ । १ । २२४ ॥ इत्यनेन दस्य वः ॥ वृत्त-प्रवृत्त-मृत्तिका-पतन-कदर्थिते टः ॥ ८ । २ । २९ ॥ इत्यनेन टः ।

### ॥ अथ निषधशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | निसढो | निसढा |
| द्वितीया | निसढं | निसढे निसढा |

इत्यादि ॥ निषधे धो ढः ॥ ८ । १ । २२६ ॥ इत्यनेन धस्य ढः ।

**॥ अथ निम्बशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | लिम्बो निम्बो | लिम्बा निम्बा |

इत्यादि

**॥ अथ नापितशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | ण्हाविओ नाविओ | ण्हाविआ नाविआ |

इत्यादि ॥ निम्ब-नापिते ल-ण्हं वा ॥ ८ । १ । २३० ॥ अनयोर्नस्य लण्हौ वा भवतः ॥

**॥ अथ परुषशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | फरुसो | फरुसा |
| **द्वितीया** | फरुसं | फरुसे फरुसा |

इत्यादि

**॥ अथ परिघशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | फलिहो | फलिहा |

इत्यादि

**॥ अथ पनस शब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | फणसो | फणसा |

इत्यादि

## ॥ अथ पारिभद्रशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | फालिहद्दो | फालिहद्दा |

इत्यादि ॥ पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः ॥ ८ । १ । २३२ ॥ इत्यनेन पस्य फः । हरिद्रादौ लः ॥ इत्यनेन लकारः ।

## ॥ अथ नीपशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | नीमो नीवो | नीमा नीवा |

इत्यादि ॥ नीपापीडे मो वा ॥ ८ । १ । २३४ ॥ इत्यनेन पस्य वा मः ।

## ॥ अथ रेफशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | रेभो | रेभा |

इत्यादि ॥ फोभ-हौ ॥ ८ । १ । २३६ ॥ इत्यनेन फस्य भः । क्वचिद् हकारोऽपि । यथा । मुत्ताहलं ।

## ॥ अथ शबलशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | सवलो | सवला |
| **द्वितीया** | सवलं | सवले सवला |

इत्यादि ॥ बो वः ॥ ८ । १ । २३७ ॥ इत्यनेन बस्य वः । एवं प्रबलादयः ।

## ॥ अथ कबन्धशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | कमन्धो कयन्धो | कमन्धा कयन्धा |

इत्यादि ॥ कबन्धे मयौ ॥ ८ । १ । २३९ ॥ इत्यनेन बस्य मयौ भवतः ।

## ॥ अथ विषमशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | विसढो विसमो | विसढा विसमा |

इत्यादि

इत्यादि ॥ विषमे मो ढो वा ॥ ८ । १ । २४१ ॥ इत्यनेन मस्य वा ढः ।

## ॥ अथ मन्मथशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | वम्महो | वम्महा |
| **द्वितीया** | वम्महं | वम्महे वम्महा |

इत्यादि ॥ मन्मथे वः ॥ ८ । १ । २४२ ॥ इत्यनेनादेर्मस्य वः । न्मो मः ॥ ८ । २ । ६१ ॥ इत्यनेन न्मस्य मः ।

## ॥ अथ भ्रमरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | भसलो भमरो | भसला भमरा |

इत्यादि ॥ भ्रमरे सो वा ॥ ८ । १ । २४४ ॥ इत्यनेन मस्य सो वा ।

## ॥ अथ करणीयशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | करणिज्जो करणीओ | करणिज्जा करणीआ |

इत्यादि

## ॥ अथ पेयशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पेज्जो पेओ | पेज्जा पेआ |

इत्यादि ॥ वोत्तरीयानीयतीयकृद्ये ज्जः ॥ ८ । १ । २४८ ॥ इत्यनेन यकारस्य द्विरुक्तो जो वा भवति ।

## ॥ अथ कतिपयशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कइवाहो कइवओ | कइवाहा कइवआ |

इत्यादि ॥ डाह-वौ कतिपये ॥ ८ । १ । २५० ॥ इत्यनेन यकारस्य डाह व इत्येतौ पर्यायेण भवतः । नपुंसके तु । कइवाहं, कइअवं, इत्यादि ।

## ॥ अथ करवीरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कणवीरो | कणवीरा |

इत्यादि ॥ करवीरे णः ॥ ८ । १ । २५३ ॥ इत्यनेन प्रथमस्य रस्य णः ।

## ॥ अथ दरिद्रशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दलिद्दो | दलिद्दा |

इत्यादि

## ॥ अथ मुखरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | मुहलो | मुहला |

इत्यादि

## ॥ अथ [1]चरणशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | चलणो | चलणा |

इत्यादि

## ॥ अथ वरुणशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | वलुणो | वलुणा |
| **द्वितीया** | वलुणं | वलुणे वलुणा |

इत्यादि

## ॥ अथ रुग्णशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | लुक्को लुग्गो | लुक्का लुग्गा |

इत्यादि ॥ शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे-को वा ॥ ८ । २ । २ ॥ इत्यनेन संयुक्तस्य को वा ।

## ॥ अथ बठरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | बढलो | बढला |

इत्यादि

---

१ चरणशब्दस्य पादार्थवृत्तेरेव । अन्यत्र चरण-करणं

**॥ अथ निष्ठुरशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | णिट्ठुलो | णिट्ठुला |

इत्यादि

**॥ अथ शबरशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | समरो | समरा |

इत्यादि ॥ शबरे बो मः ॥ ८ । १ । २५८ ॥ इत्यनेन बस्य मः । समरशब्दस्यापि । समरो, समरा, इत्यादि ।

**॥ अथ दशमुखशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | दहमुहो | दहमुहा |

इत्यादि

**॥ अथ दशबलशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | दहबलो | दहबला |

इत्यादि

**॥ अथ दशरथशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | दहरहो | दहरहा |

इत्यादि

### ॥ अथ पाषाणशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पाहाणो | पाहाणा |

इत्यादि ॥ दश-पाषाणे हः ॥ ८ । १ । २६२ ॥ इत्यनेन दशन्शब्दे पाषाणशब्दे च शषोर्यथाक्रमं हो वा । पक्षे । दसमुहो, दसबलो, दसरहो, पासाणो, इत्यादि ।

### ॥ अथ दिवसशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | दिवहो | दिवहा |

इत्यादि ॥ दिवसे सः ॥ ८ । १ । २६३ ॥ इत्यनेन सस्य वा हकारः । पक्षे - दिवसो, इत्यादि ।

### ॥ अथ संहारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | संघारो संहारो | संघारा संहारा |

इत्यादि ॥ हो घोऽनुस्वारात् ॥ ८ । १ । २६४ ॥ इत्यनेन हस्य घः । क्वचिदननुस्वारादपि । दाहशब्दस्य - डाघो, दाघो ।

### ॥ अथ प्राकारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पारो पायारो | पारा पायारा |

इत्यादि

### ॥ अथाऽऽगत-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | आओ आगओ | आआ आगआ |

इत्यादि ॥ व्याकरण-प्राकारागते कगोः ॥ ८ । १ । २६८ ॥ इत्यनेन सस्वरस्य कस्य गस्य लुग्वा भवति । व्याकरणशब्दस्य तु । वारणं, वायरणं, इति क्लीबे ।

## ॥ अथोदुम्बर-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | उम्बरो उउम्बरो | उम्बरा उउम्बरा |

इत्यादि ॥ दुर्गादेव्युदुम्बर-पादपतन-पादपीठेऽन्तर्दः ॥ ८ । १ । २७० ॥ इत्यनेन सस्वरस्य दकारस्य लुग्वा । दुर्गादेवीशब्दस्य । दुग्गा-वी । दुग्गाएवी, इति स्त्रीलिङ्गे मालावत् । पादपतनस्य । पा-वडणं । पाय-वडणं । पादपीठस्य । पावीढं-पाय-वीढं । इत्यादि तु क्लीबे ।

## ॥ अथाऽऽवर्त्तमान-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | अत्तमाणो आवत्तमाणो | अत्तमाणा आवत्तमाणा |

इत्यादि

## ॥ अथाऽवट-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | अडो अवडो | अडा अवडा |

इत्यादि

## ॥ अथ प्रावारकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पारओ पावारओ | पारआ पावारआ |

इत्यादि ॥ यावत्तावज्जीवितावर्त्तमानावटप्रावारकदेवकुलैवमेवे वः ॥ ८ । १ । २७१ ॥ इत्यनेन यावदादिषु शब्देषु सस्वरस्य वकारस्य लुग्वा भवति । यावत्, जा, जाव, तावत्, ता, ताव, जीवितम्, जीअं, जीविअं, देवकुलं, दे-उलं, देव-उलं, एवमेव, एमेव, एवमेव ।

**॥ अथ शक्तशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सक्को सत्तो | सक्का सत्ता |

इत्यादि

**॥ अथ मुक्तशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मुक्को मुत्तो | मुक्का मुत्ता |

इत्यादि ॥ शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा ॥ ८ । २ । २ ॥ इत्यनेन कः । शक्रशब्दस्य सक्को । सत्त्वशब्दस्य तु सत्तो । सक्तशब्दस्यापि सत्तो ।

**॥ अथ संयुक्तशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | संजुत्तो | संजुत्ता |

इत्यादि ॥ आदेर्यो जः ॥ ८ । १ । २४५ ॥ इत्यस्मिन् सूत्रे बहुलाधिकारात् सोपसर्गस्यानादेरपि भवतीति प्रतिपादनादत्र जः ।

**॥ अथ निष्क्रयशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | निक्कओ | निक्कआ |

इत्यादि

**॥ अथ तस्करशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | तक्करो | तक्करा |

इत्यादि

**॥ अथ शुष्कशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | सुक्खो सुक्को | सुक्खा सुक्का |

इत्यादि

**॥ अथ स्कन्दशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | खन्दो कन्दो | खन्दा कन्दा |

इत्यादि ॥ शुष्क-स्कन्दे वा ॥ ८ । २ । ५ ॥ इत्यनेन वा खः ।

**॥ अथ क्ष्वेटकशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | खेडओ | खेडआ |

इत्यादि

**॥ अथ क्ष्वोटकशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | खोडओ | खोडआ |

इत्यादि

### ॥ अथ स्फेटकशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | खेडओ | खेडआ |

इत्यादि

### ॥ अथ स्फेटिकशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | खेडिओ | खेडिआ |

इत्यादि ॥ क्ष्वेटकादौ ॥ ८ । २ । ६ ॥ इत्यनेन खः ।

### ॥ अथ व्यतिक्रान्तशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | वइक्कन्तो | वइक्कन्ता |
| **द्वितीया** | वइक्कन्तं | वइक्कन्ते वइक्कन्ता |

इत्यादि

### ॥ अथ स्तम्भशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | खम्भो थम्भो | खम्भा थम्भा |

इत्यादि ॥ स्तम्भे स्तो वा ॥ ८ । २ । ८ ॥ इत्यनेन स्तस्य वा खः । पक्षे ॥ स्तस्य थोऽसमस्त-स्तम्बे ॥ ८ । २ । ४५ ॥ इत्यनेन स्तस्य थः । स्तम्भः काष्ठादिमयः । स्पन्दाभाववृत्तौ तु ॥ थ-ठावस्पन्दे ॥ ८ । २ । ९ ॥ इत्यनेन स्तस्य थ-ठौ भवतः । यथा ।

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | थम्भो ठम्भो | थम्भा ठम्भा |

॥ अथ रक्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | रग्गो रत्तो | रग्गा रत्ता |

इत्यादि ॥ रक्ते गो वा ॥ ८ । २ । १० ॥ इत्यनेन गो वा ॥

॥ अथ प्रत्यूषशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पच्चूहो पच्चूसो | पच्चूहा पच्चूसा |

इत्यादि ॥ प्रत्यूषे षश्च हो वा ॥ ८ । २ । १४ ॥ इत्यनेन प्रत्यूषशब्दे त्यस्य चो भवति तत्सन्नियोगे च षस्य हकारः

॥ अथ कक्षशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कच्छो | कच्छा |

इत्यादि

॥ अथ दक्षशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दच्छो | दच्छा |

इत्यादि

॥ अथ क्षुण्णशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | छुण्णो | छुण्णा |

इत्यादि

॥ अथ क्षारशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | छारो | छारा |

इत्यादि

॥ अथ क्षुरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | छुरो | छुरा |

इत्यादि ॥ छोऽक्ष्यादौ ॥ ८ । २ । १७ ॥ इत्यनेन क्षस्य छः ।

॥ अथ क्षणशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | छणो | छणा |
| द्वितीया | छणं | छणे छणा |

इत्यादि देववत्

क्षण उत्सवे ॥ ८ । २ । २० ॥ इत्यनेन क्षणशब्दे उत्सववाचिनि वर्त्तमानस्य क्षस्य छः । उत्सवाभावे तु, खणो खणा, इत्यादि ।

॥ अथ निःस्पृहशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | निप्पिहो | निप्पिहा |

इत्यादि

॥ अथ ध्वजशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | झओ धओ | झआ धआ |

इत्यादि ॥ ध्वजे वा ॥ ८ । २ । २७ ॥ इत्यनेन ध्वजशब्दे ध्व इत्यस्य वा झः ।

## ॥ अथ वृत्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वट्टो | वट्टा |
| द्वितीया | वट्टं | वट्टे वट्टा |

इत्यादि

## ॥ अथ प्रवृत्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पवट्टो | पवट्टा |

इत्यादि ॥ वृत्त-प्रवृत्त-मृत्तिका-पत्तन-कदर्थिते टः ॥ ८ । २ । २९ ॥ इत्यनेन संयुक्तस्य टः । मृत्तिकाशब्दस्य तु, मट्टिआ इति स्त्रीलिङ्गे । पत्तनशब्दस्य तु, पट्टणं ।

## ॥ अथ कैवर्त्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | केवट्टो | केवट्टा |

इत्यादि

## ॥ अथ जर्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जट्टो | जट्टा |

इत्यादि ॥ र्त्तस्याऽधूर्त्तादौ ॥ ८ । २ । ३० ॥ इत्यनेन र्त्तस्य टकारो भवति धूर्त्तादीन् वर्जयित्वा ।

## ॥ अथ धूर्त्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | धुत्तो | धुत्ता |

इत्यादि

### ॥ अथ मूर्त्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मुत्तो | मुत्ता |

इत्यादि

### ॥ अथ मुहूर्त्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मुहुत्तो | मुहुत्ता |

इत्यादि

### ॥ अथ विसंस्थुलशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | विसंठुलो | विसंठुला |
| द्वितीया | विसंठुलं | विसंठुले विसंठुला |

इत्यादि ॥ ठोऽस्थिविसंस्थुले ॥ ८ । २ । ३२ ॥ इत्यनेन संयुक्तस्य ठः ।

### ॥ अथ गर्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | गड्डो | गड्डा |
| द्वितीया | गड्डुं | गड्डे गड्डा |

इत्यादि ॥ गर्त्ते डः ॥ ८ । २ । ३५ ॥ इत्यनेन डः ।

### ॥ अथ सम्मर्दशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सम्मड्डो | सम्मड्डा |

इत्यादि

## ॥ अथ विच्छर्दशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | विच्छड्डो | विच्छड्डा |

इत्यादि

## ॥ अथ कपर्दशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कवड्डो | कवड्डा |

इत्यादि

## ॥ अथ मर्दितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मड्डिओ | मड्डिआ |

इत्यादि

## ॥ अथ सम्मर्दितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सम्मड्डिओ | सम्मड्डिआ |

इत्यादि ॥ सम्मर्द-वितर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दिते र्दस्य ॥ ८ । २ । ३६ ॥ इत्यनेन र्दस्य ड्डत्वं भवति । वितर्दिशब्दस्य तु विअड्डी । छर्दिशब्दस्य तु छड्डी, इत्यादि मुनिवत् ।

## ॥ अथ गर्दभशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | गड्डहो | गड्डहा |
| द्वितीया | गड्डहं | गड्डहे गड्डहा |

इत्यादि ॥ गर्दभे वा ॥ ८ । २ । ३७ ॥ इत्यनेन र्दस्य वा डः ।

## ॥ अथ भिन्दिपालशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भिण्डिवालो | भिण्डिवाला |

इत्यादि ॥ कन्दरिकाभिन्दिपाले ण्डः ॥ ८ । २ । ३८ ॥ इत्यनेन ण्डः । कन्दरिकाशब्दस्य तु कण्डलिआ, इति

## ॥ अथ स्तब्धशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | ठड्ढो | ठड्ढा |
| द्वितीया | ठड्ढं | ठड्ढे ठड्ढा |

इत्यादि ॥ स्तब्धे ठढौ ॥ ८ । २ । ३९ ॥ इत्यनेन स्तब्धशब्दे संयुक्तयोर्यथाक्रमं ठढौ भवतः ।

## ॥ अथ पर्यस्तशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पल्लत्थो पल्लट्टो | पल्लत्था पल्लट्टा |
| द्वितीया | पल्लत्थं पल्लट्टं | पल्लत्थे पल्लत्था<br>पल्लट्टे पल्लट्टा |

इत्यादि ॥ पर्यस्ते थ-टौ ॥ ८ । २ । ४७ ॥ इत्यनेन पर्यस्तशब्दे पर्यायेण थटौ भवतः ॥ पर्यस्त-पर्याण-सौकुमार्ये ल्लः ॥ ८ । २ । ६८ ॥ इत्यनेन ल्लः ।

## ॥ अथ पल्यङ्कशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पल्लंको पलिअंको | पल्लंका पलिअंका |

इत्यादि

## ॥ अथ कृष्णशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कसणो कसिणो<br>कण्हो | कसणा कसिणा<br>कण्हा |

इत्यादि ॥ कृष्णे वर्णे वा ॥ ८ । २ । ११० ॥ वर्णवाचिनि कृष्णशब्दे संयुक्तस्यान्त्यव्यञ्जनात्पूर्वावदितौ वा विष्णुवाचिनस्तु कण्हो कण्हा इत्यादि ।

## ॥ अथ स्नातशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | ण्हाओ | ण्हाआ |

इत्यादि

## ॥ अथ प्रस्नुतशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पण्हुओ | पण्हुआ |

इत्यादि ॥ सूक्ष्म-श्न-ष्ण-स्नं-ह्न-ह्ण-क्ष्णां ण्हः ॥ ८ । २ । ७५ ॥ इत्यनेन स्न इत्यस्य ण्हः ।

## ॥ अथ प्रह्लादशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पल्हाओ | पल्हाआ |
| द्वितीया | पल्हाअं | पल्हाए पल्हाआ |

इत्यादि ॥ ह्लो ल्हः ॥ ८ । २ । ७६ ॥ इत्यनेन ह्लस्थाने ल्हः ।

### ।। अथ दशार्हशब्दः ।।

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | दसारो | दसारा |
| **द्वितीया** | दसारं | दसारे दसारा |

इत्यादि ।। दशार्हे ।। ८ । २ । ८५ ।। इत्यनेन हस्य लुक् ।

### ।। अथ हरिश्चन्द्रशब्दः ।।

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | हरिअन्दो | हरिअन्दा |

इत्यादि ।। श्चो हरिश्चन्द्रे ।। ८ । २ । ८७ ।। इत्यनेन श्च इत्यस्य लुक् ।

### ।। अथ धृष्टद्युम्नशब्दः ।।

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | धट्ठज्जुणो | धट्ठज्जुणा |
| **द्वितीया** | धट्ठज्जुणं | धट्ठज्जुणे धट्ठज्जुणा |

इत्यादि ।। म्नज्ञोर्णः ।। ८ । २ । ४२ ।। इत्यनेन म्नस्य णः ।। धृष्टद्युम्ने णः ।। ८ । २ । ९४ ।। इत्यनेन द्वित्वाभावः ।

### ।। अथ विख्यातशब्दः ।।

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | विक्खाओ | विक्खाआ |

इत्यादि

## ॥ अथालानस्तम्भशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | आणालक्खंभो<br>आणालखंभो | आणालक्खंभा<br>आणालखंभा |

इत्यादि ॥ आलाने लनोः ॥ ८ । २ । ११७ ॥ इत्यनेनालानशब्दे लनोर्व्यत्ययो भवति ।

## ॥ अथ कुसुमप्रकरशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | कुसुमप्पयरो<br>कुसुमपयरो | कुसुमप्पयरा<br>कुसुमपयरा |

इत्यादि

## ॥ अथ सपिपासशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | सप्पिवासो सपिवासो | सप्पिवासा सपिवासा |

इत्यादि ॥ समासे वा ॥ ८ । २ । ९७ ॥ इत्यनेन वा द्वित्वम् ।

## ॥ अथ मण्डूकशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | मण्डुक्को | मण्डुक्का |

इत्यादि ॥ तैलादौ ॥ ८ । २ । ९८ ॥ इत्यनेन द्वित्वम् ।

## ॥ अथ व्याकुलशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | वाउल्लो वाउलो | वाउल्ला वाउला |

इत्यादि

## ॥ अथ निहितशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | निहित्तो | निहित्ता |

इत्यादि

## ॥ अथ स्थूलशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | थुल्लो थोरो | थुल्ला थोरा |

इत्यादि ॥ स्थूले लो रः ॥ ८ । १ । २५५ ॥ इत्यनेन लस्य रः ॥ ओत्कुष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये ॥ ८ । १ । १२४ ॥ इत्यनेन ऊत ओत्त्वम् ।

## ॥ अथ तूष्णिकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | तुण्हिक्को तुण्हिओ तुण्हिगो | तुण्हिक्का तुण्हिआ तुण्हिगा |

इत्यादि

## ॥ अथ मूकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मूक्को मूओ मूगो | मूक्का मूआ मूगा |

सेवादौ वा ॥ ८ । २ । ९९ ॥ इत्यनेन वा द्वित्वम् ।

## ॥ अथ प्लक्षशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पलक्खो | पलक्खा |

इत्यादि ॥ प्लक्षे लात् ॥ ८ । २ । १०३ ॥ इत्यनेन संयुक्तस्यान्त्यव्यञ्जनाल्लात् पूर्वोऽद्भवति ।

## ॥ अथ ह्रीतशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | हिरीओ | हिरीआ |
| द्वितीया | हिरीअं | हिरीए हिरीआ |

इत्यादि

## ॥ अथाऽह्रीकशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अहिरीओ | अहिरीआ |

इत्यादि

## ॥ अथाश्लिष्ट-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | आलिद्धो | आलिद्धा |

इत्यादि ॥ आश्लिष्टे लधौ ॥ ८ । २ । ४९ ॥ इत्यनेनाश्लिष्टशब्दे संयुक्तयोर्यथाक्रमं लधौ भवतः ।

## ॥ अथ भस्मन्शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भप्पो भस्सो | भप्पा भस्सा |

इत्यादि ॥ भस्मात्मनोः पो वा ॥ ८ । २ । ५१ ॥ इत्यनेन संयुक्तस्य पः ।

## ॥ अथ निष्पेषशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | निप्फेसो | निप्फेसा |

इत्यादि ॥ ष्प-स्पयोः फः ॥ ८ । २ । ५३ ॥ इत्यनेन फः । एवं निष्पावादयः ।

## ॥ अथ भीष्मशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भिप्फो | भिप्फा |

इत्यादि ॥ भीष्मे ष्मः ॥ ८ । २ । ५४ ॥ इत्यनेन फः ।

## ॥ अथ श्लेष्मशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सेफो सिलिम्हो | सेफा सिलिम्हा |

इत्यादि ॥ श्लेष्मणि वा ॥ ८ । २ । ५५ ॥ इत्यनेन श्लेष्मशब्दे ष्म इत्यस्य फो वा । पक्षे ॥ लात् ॥ ८ । २ । १०६ ॥ इत्यनेन लकारात्पूर्व इकारः ।

## ॥ अथ ग्लानशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | गिलाणो | गिलाणा |

इत्यादि

## ॥ अथ विह्वल शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भिब्भलो विब्भलो<br>विहलो | भिब्भला विब्भला<br>विहला |

इत्यादि ॥ वा विह्वले वौ वश्च ॥ ८ । २ । ५८ ॥ इत्यनेन विह्वलशब्दे ह्वस्य भो वा तत्सन्नियोगे च विशब्दे वस्य वा भकारः ।

## ॥ अथ बाष्पशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | बाहो | बाहा |

इत्यादि ॥ बाष्पे होऽश्रुणि ॥ ८ । २ । ७० ॥ इत्यनेन संयुक्तस्य होऽश्रुण्यभिधेये सति । उष्मावाचिबाष्पशब्दस्य तु बप्फो बप्फा इत्यादि ।

## ॥ अथ कार्षापणशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | काहावणो | काहावणा |
| **द्वितीया** | काहावणं | काहावणे काहावणा |

इत्यादि ॥ कार्षापणे ॥ ८ । २ । ७१ ॥ इत्यनेन संयुक्तस्य हः ह्रस्वः संयोगे ॥ ८ । १ । ८४ ॥ इत्यनेन पूर्वमेव ह्रस्वे कृते पश्चाद् हकारे कृते सति कहावणो कहावणा इत्यादि । अथवा कर्षापणशब्दस्य कहावणो कहावणा इति ज्ञेयम् ॥ र-होः ॥ ८ । २ । ९३ ॥ इत्यनेन द्वित्वनिषेधः ।

## ॥ अथार्ह-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | अरिहो | अरिहा |
| **द्वितीया** | अरिहं | अरिहे अरिहा |

इत्यादि

## ॥ अथ बर्हशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | बरिहो | बरिहा |

इत्यादि

## ॥ अथ कृत्स्नशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | कसिणो | कसिणा |

इत्यादि ॥ ई-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित् ॥ ८ । २ । १०४ ॥ इत्यनेन संयुक्तस्यान्त्यव्यञ्जनात्पूर्व इकारः । आर्षमते कसिणे, इति प्रथमैकवचने एकारः । एवं सर्वत्र बोध्यम् ।

## ॥ अथादर्श-शब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | आयरिसो आयंसो | आयरिसा आयंसा |

इत्यादि

## ॥ अथ सुदर्शनशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | सुदरिसणो सुदंसणो | सुदरिसणा सुदंसणा |

इत्यादि

## ॥ अथ परामर्शशब्दः ॥

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | परामरिसो | परामरिसा |

इत्यादि

### ॥ अथ हर्षशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | हरिसो | हरिसा |

इत्यादि

### ॥ अथामर्ष-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अमरिसो | अमरिसा |

इत्यादि ॥ र्श-र्ष-तप्तवज्रे वा ॥ ८ । २ । १०५ ॥ इत्यनेन संयुक्तस्यान्त्यव्यञ्जनात्पूर्वो वा इकारः । परामर्शादिषु नित्यः ।

### ॥ अथ मूर्खशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मुरुक्खो मुक्खो | मुरुक्खा मुक्खा |

इत्यादि ॥ पद्म-छद्म-मूर्ख-द्वारे वा ॥ ८ । २ । ११२ ॥ इत्यनेन संयुक्तस्यान्त्यव्यञ्जनात्पूर्व उद्वा ।

### ॥ अथ हरितालशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | हलिआरो हरिआलो | हलिआरा हरिआला |

इंत्यादि ॥ हरिताले रलोर्नवा ॥ ८ । २ । १२१ ॥ इत्यनेन रकारलकारयोर्वा व्यत्ययः ।

### ॥ अथ ह्रदशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | द्रहो दहो | द्रहा दहा |

इत्यादि ॥ ह्रदे ह-दोः ॥ ८ । २ । १२० ॥ इत्यनेन हकारदकारयोर्व्यत्ययः ॥ द्रे रो न वा ॥ ८ । २ । ८० ॥ इत्यनेन द्रशब्दे रेफस्य वा लुक् । आर्षे तु हरए महपुण्डरीए इति ।

**॥ अथ हसितशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | हसिरो | हसिरा |
| **द्वितीया** | हसिरं | हसिरे हसिरा |

इत्यादि

**॥ अथ रोपितशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | रोविरो | रोविरा |

इत्यादि

**॥ अथ लज्जितशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | लज्जिरो | लज्जिरा |

इत्यादि

**॥ अथ भ्रमितशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | भमिरो | भमिरा |

इत्यादि

**॥ अथ जल्पित शब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जंपिरो | जंपिरा |

इत्यादि

**॥ अथ वेपितशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वेविरो | वेविरा |

इत्यादि ॥ शीलाद्यर्थस्येरः ॥ ८ । २ । १४५ ॥ इत्यनेनेर इत्यादेशः । बहुलाधिकारात् हसिओ रोविओ इत्याद्यपि भवति । हसनशीलो हसिरो, इत्यादि । एवमुच्छ्वसितादयः।

**॥ अथ युष्मदीयशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | तुम्हकेरो | तुम्हकेरा |

इत्यादि

**॥ अथास्मदीय-शब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अम्हकेरो | अम्हकेरा |

इत्यादि ॥ इदमर्थस्य केरः ॥ ८ । २ । १४७ ॥ इत्यनेन इदमर्थस्य प्रत्ययस्य केर इत्यादेशः ।

# ॥ अथाकारान्तपुल्लिङ्गः ॥

## ॥ सर्वशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सव्वो | सव्वे |
| द्वितीया | सव्वं | सव्वे सव्वा |
| तृतीया | सव्वेणं सव्वेण | सव्वेहि सव्वेहिं सव्वेहिँ |
| पंचमी | सव्वत्तो सव्वाओ सव्वाउ सव्वाहि सव्वाहिन्तो सव्वा | सव्वत्तो सव्वाओ सव्वाउ सव्वाहि सव्वेहि सव्वाहिन्तो सव्वेहिन्तो सव्वासुन्तो सव्वेसुन्तो |
| षष्ठी | सव्वस्स | सव्वेसिं सव्वाणं सव्वाण |
| सप्तमी | सव्वस्सिं सव्वम्मि सव्वत्थ सव्वहिं | सव्वेसुं सव्वेसु |
| संबोधनम् | हे सव्व हे सव्वो | हे सव्वा |

॥ अतः सर्वादेर्डेर्जसः ॥ ८ । ३ । ५८ ॥ इत्यनेन सर्वादिरदन्तात् परस्य जसो डिदेकारः ॥ आमो डेसिं ॥ ८ । ३ । ६१ ॥ इत्यनेनामः स्थाने डेसिमित्यादेशो वा ॥ नवानिदमेतदो हिं ॥ ८ । ३ । ६० ॥ इत्यनेन ङेर्हिमित्यादेशः ॥ ङेः स्सिम्मित्थाः ॥ ८ । ३ । ५९ ॥ इत्यनेन ङेः स्थाने स्सि-म्मि-त्था इत्येते आदेशा भवन्ति ।

## ॥ अथ विश्व शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वीसो | वीसे |
| द्वितीया | वीसं | वीसे वीसा |
| तृतीया | वीसेणं वीसेण | वीसेहि वीसेहिं वीसेहिँ |
| पंचमी | वीसत्तो वीसाओ वीसाउ वीसाहि वीसाहिन्तो वीसा | वीसत्तो वीसाओ वीसाउ वीसाहि वीसेहि वीसाहिन्तो वीसेहिन्तो वीसासुन्तो वीसेसुन्तो |
| षष्ठी | वीसस्स | वीसेसिं वीसाणं वीसाण |
| सप्तमी | वीसस्सि वीसम्मि वीसत्थ वीसहिं | वीसेसुं वीसेसु |
| संबोधनम् | हे वीस हे वीसो | हे वीसे |

सर्ववाची विश्वशब्दः सर्वादिवत् जगद्वाची तु कुलवत् ।

## ॥ अथान्य-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अन्नो | अन्ने |
| द्वितीया | अन्नं | अन्ने अन्ना |
| तृतीया | अन्नेणं अन्नेण | अन्नेहि अन्नेहिं अन्नेहिँ |

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| पंचमी | अन्नत्तो अन्नाओ अन्नाउ अन्नाहि अन्नाहिन्तो अन्ना | अन्नत्तो अन्नाओ अन्नाउ अन्नाहि अन्नेहि अन्नाहिन्तो अन्नेहिन्तो अन्नासुन्तो अन्नेसुन्तो |
| षष्ठी | अन्नस्स | अन्नेसिं अन्नाणं अन्नाण |
| सप्तमी | अन्नस्सि अन्नम्मि अन्नत्थ अन्नहिं | अन्नेसुं अंन्नेसु |
| संबोधनम् | हे अन्न हे अन्नो | हे अन्ने |

## ॥ अथान्यतर-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अन्नयरो | अन्नयरे |
| द्वितीया | अन्नयरं | अन्नयरे अन्नयरा |
| तृतीया | अन्नयरेणं अन्नयरेण | अंन्नयरेहि अन्नयरेहिं अन्नयरेहिँ |
| पंचमी | अन्नयरत्तो अन्नयराओ अन्नयराउ अन्नयराहि अन्नयराहिन्तो अन्नयरा | अन्नयरत्तो अन्नयराओ अन्नयराउ अन्नयराहि अन्नयरेहि अन्नयराहिन्तो अन्नयरेहिन्तो अन्नयरासुन्तो अन्नयरेसुन्तो |

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| षष्ठी | अन्नयरस्स | अन्नयरेसिं<br>अन्नयराणं-ण |
| सप्तमी | अन्नयरस्सि अन्नयरम्मि<br>अन्नयरत्थ अन्नयरहिं | अन्नयरेसुं अन्नयरेसु |
| संबोधनम् | हे अन्नयर हे अन्नयरो | हे अन्नयरे |

॥ अथेतर-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | इयरो | इयरे |
| द्वितीया | इयरं | इयरे इयरा |
| तृतीया | इयरेणं इयरेण | इयरेहि इयरेहिं<br>इयरेहिँ |
| पंचमी | इयरत्तो इयराओ<br>इयराउ इयराहि<br>इयराहिन्तो इयरा | इयरत्तो इयराओ<br>इयराउ इयराहि<br>इयरेहि इयराहिन्तो<br>इयरेहिन्तो इयरासुन्तो<br>इयरेसुन्तो |
| षष्ठी | इयरस्स | इयरेसिं इयराणं<br>इयराण |
| सप्तमी | इयरस्सि इयरम्मि<br>इयरत्थ इयरहिं | इयरेसुं<br>इयरेसु |
| संबोधनम् | हे इयर हे इयरो | हे इयरे |

## ॥ अथ कतरशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कयरो | कयरे |
| द्वितीया | कयरं | कयरे कयरा |
| तृतीया | कयरेणं कयरेण | कयरेहि कयरेहिं कयरेहिँ |
| पंचमी | कयरत्तो कयराओ कयराउ कयराहि कयराहिन्तो कयरा | कयरत्तो कयराओ कयराउ कयराहि कयरेहि कयराहिंन्तो कयरेहिन्तो कयरासुन्तो कयरेसुन्तो |
| षष्ठी | कयरस्स | कयरेसिं कयराणं कयराण |
| सप्तमी | कयरस्सि कयरम्मि कयरत्थ कयरहिं | कयरेसुं कयरेसु |
| संबोधनम् | हे कयर हे कयरो | हे कयरे |

## ॥ अथ कतमशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कइमो | कइमे |
| द्वितीया | कइमं | कइमे कइमा |
| तृतीया | कइमेणं कइमेण | कइमेहि कइमेहिं कइमेहिँ |

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| पंचमी | कइमत्तो कइमाओ<br>कइमाउ कइमाहि<br>कइमाहिन्तो कइमा | कइमत्तो कइमाओ<br>कइमाउ कइमाहि<br>कइमेहि कइमाहिन्तो<br>कइमेहिन्तो कइमासुन्तो<br>कइमेसुन्तो |
| षष्ठी | कइमस्स | कइमेसिं कइमाणं<br>कइमाण |
| सप्तमी | कइमस्सि कइमम्मि<br>कइमत्थ कइमहिं | कइमेसुं कइमेसु |
| संबोधनम् | हे कइम हे कइमो | हे कइमे |

॥ मध्यम-कतमे द्वितीयस्य ॥ ८ । १ । ४८ ॥ इत्यनेन द्वितीयस्यात इकारः ।

## ॥ अथ सम-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | समो | समे |
| द्वितीया | समं | समे समा |
| तृतीया | समेणं समेण | समेहि समेहिं<br>समेहिँ |
| पंचमी | समत्तो समाओ<br>समाउ समाहि<br>समाहिन्तो समा | समत्तो समाओ<br>समाउ समाहि<br>समेहि समाहिन्तो<br>समेहिन्तो समासुन्तो<br>समेसुन्तो |

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| षष्ठी | समस्स | समेसिं समाणं समाण |
| सप्तमी | समस्सि समम्मि समत्थ समहिं | समेसुं समेसु |
| संबोधनम् | हे सम हे समो | हे समे |

## ॥ अथ सिमशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सिमो | सिमे |
| द्वितीया | सिमं | सिमे सिमा |
| तृतीया | सिमेणं सिमेण | सिमेहि सिमेहिं सिमेहिँ |
| पंचमी | सिमत्तो सिमाओ सिमाउ सिमाहि सिमाहिन्तो सिमा | सिमत्तो सिमाओ सिमाउ सिमाहि सिमेहि सिमाहिन्तो सिमेहिन्तो सिमासुन्तो सिमेसुन्तो |
| षष्ठी | सिमस्स | सिमेसिं सिमाणं सिमाण |
| सप्तमी | सिमस्सि सिमम्मि सिमत्थ सिमहिं | सिमेसुं सिमेसु |
| संबोधनम् | हे सिम हे सिमो | हे सिमे |

समसिमौ यदा सर्वार्थौ तदैव सर्वादिकार्यं भवति तुल्यार्थे तु न।

## ॥ अथ नेमशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | नेमो | नेमे |
| द्वितीया | नेमं | नेमे नेमा |
| तृतीया | नेमेणं नेमेण | नेमेहि नेमेहिं नेमेहिँ |
| पंचमी | नेमत्तो नेमाओ नेमाउ नेमाहि नेमाहिन्तो नेमा | नेमत्तो नेमाओ नेमाउ नेमाहि नेमेहि नेमाहिन्तो नेमेहिन्तो नेमासुन्तो नेमेसुन्तो |
| षष्ठी | नेमस्स | नेमेसिं नेमाणं नेमाण |
| सप्तमी | नेमस्सिं नेमम्मि नेमत्थ नेमहिं | नेमेसुं नेमेसु |
| संबोधनम् | हे नेम हे नेमो | हे नेमे |

## ॥ अथैक-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | एक्को एओ एक्कल्लो एगो | एक्के एए एक्कल्ले एगे |

इत्यादि सर्ववत् ॥ ल्लो नवैकाद्वा ॥ ८ । २ । १६५ ॥ इत्यनेनैकशब्दात्परः संयुक्तो लो वा भवति ॥ सेवादौ वा ॥ ८ । २ । ९९ ॥ इत्यनेन वा द्वित्वम् ।

## ॥ अथ पूर्वशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पुरिमो पुव्वो | पुरिमे पुव्वे |
| द्वितीया | पुरिमं पुव्वं | पुरिमे पुव्वे<br>पुरिमा पुव्वा |

इत्यादि सर्ववत् ॥ पूर्वस्य पुरिमः ॥ ८ । २ । १३५ ॥ इत्यनेन पूर्वस्य स्थाने पुरिम इत्यादेशो वा भवति । एवं परावरोत्तरा-पराधरादयोऽकारान्ताः पुल्लिङ्गाः सर्ववज्ज्ञेयाः ।

## ॥ अथ दक्षिणशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दाहिणो दक्खिणो | दाहिणे दक्खिणे |
| द्वितीया | दाहिणं दक्खिणं | दाहिणे दक्खिणे<br>दाहिणा दक्खिणा |
| तृतीया | दाहिणेणं दक्खिणेणं<br>दाहिणेण दक्खिणेण | दाहिणेहि दाहिणेहिं<br>दाहिणेहिँ दक्खिणेहि<br>दक्खिणेहिं दक्खिणेहिँ |
| पंचमी | दाहिणत्तो दाहिणाओ<br>दाहिणाउ दाहिणाहि<br>दाहिणाहिन्तो दाहिणा<br>दक्खिणत्तो दक्खिणाओ<br>दक्खिणाउ दक्खिणाहि<br>दक्खिणाहिन्तो दक्खिणा | दाहिणत्तो दाहिणाओ<br>दाहिणाउ दाहिणाहि<br>दाहिणेहि दाहिणाहिन्तो<br>दाहिणेहिन्तो दाहिणासुन्तो<br>दाहिणेसुन्तो दक्खिणत्तो<br>दक्खिणाओ दक्खिणाउ<br>दक्खिणाहि दक्खिणेहि |

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| | | दक्खिणाहिन्तो दक्खिणेहिन्तो दक्खिणासुन्तो दक्खिणेसुन्तो |
| **षष्ठी** | दाहिणस्स दक्खिणस्स | दाहिणेसिं दक्खिणेसिं दाहिणाणं दाहिणाण दक्खिणाणं दक्खिणाण |
| **सप्तमी** | दाहिणंस्सि दाहिणम्मि दाहिणत्थ दाहिणहिं दक्खिणंस्सि दक्खिणम्मि दक्खिणत्थ दक्खिणहिं | दाहिणेसुं दाहिणेसु दक्खिणेसुं दक्खिणेसु |
| **संबोधनम्** | हे दाहिण हे दाहिणो हे दक्खिण हे दक्खिणो | हे दाहिणे हे दक्खिणे |

## ॥ अथ स्वशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सुवो | सुवे |
| **द्वितीया** | सुवं | सुवे सुवा |
| **तृतीया** | सुवेणं सुवेण | सुवेहि सुवेहिं सुवेहिँ |
| **पंचमी** | सुवत्तो सुवाओ सुवाउ सुवाहि सुवाहिन्तो सुवा | सुवत्तो सुवाओ सुवाउ सुवाहि सुवेहि सुवाहिन्तो सुवेहिन्तो सुवासुन्तो सुवेसुन्तो |

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| षष्ठी | सुवस्स | सुवेसिं सुवाणं सुवाण |
| सप्तमी | सुवस्सि सुवम्मि सुवत्थ सुवहिं | सुवेसुं सुवेसु |
| संबोधनम् | हे सुव हे सुवो | हे सुवे |

॥ एकस्वरे श्वः स्वे ॥ ८ । २ । ११४ ॥ इत्यनेनान्त्यव्यञ्जनात्पूर्व उकारः । एकस्वरे इति कथनात्, स-यणो, स-यणा, इत्यादिषु न । स्वजनः ।

## ॥ अथ भवच्छब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भवन्तो | भवन्ता |
| द्वितीया | भवन्तं | भवन्ते भवन्ता |

इत्यादि देववत् । शौरसेन्यान्तु, प्रथमैकवचने भवं । शेषं पूर्ववत् । एवं भगवच्छब्दस्यापि भगवं, भयवं । सम्बोधनैकवचने तु भयवं, भयव, इति । शेषं भवच्छब्दवत् । अयं भवच्छब्दो डवतुप्रत्ययान्तः ।

## ॥ अथ शतृप्रत्ययान्तो भवच्छब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भवन्तो भवमाणो | भवन्ता भवमाणा |

इत्यादि देववत् ॥ शत्रानशः ॥ ८ । ३ । १८१ ॥ इत्यनेन शतृ-आनश् इत्येतयोः स्थाने प्रत्येकं न्तमाणा इत्यादेशौ वा । एवं हसच्छब्दस्यापि हसन्तो हसमाणो इत्यादि । एवं पचद्वेपदादयः ।

भवइ, भवन्ती, भवमाणी, हसई, हसन्ती, हसमाणी, पचई, पचन्ती, पचमाणी, वेवई, वेवन्ती, वेवमाणी, इत्यादि स्त्रीलिङ्गे नदीवत्। ई च स्त्रियाम् ॥ ८ । ३ । १८२ ॥ इत्यनेन स्त्रियां शत्रानशोः स्थाने ईप्रत्ययो भवति । चकारात् न्तमाणावपि । एवं सर्वत्र ।

## ॥ अथ किं शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | को | के |
| द्वितीया | कं | के का |
| तृतीया | किणा केणं केण | केहि केहिं केहिँ |
| पंचमी | कम्हा किणो कीस कत्तो काओ काउ काहि काहिन्तो का | कत्तो काओ काउ काहि केहि काहिन्तो केहिन्तो कासुन्तो केसुन्तो |
| षष्ठी | कास कस्स | कास केसिं काणं-ण |
| सप्तमी | कहिं कस्सि कम्मि कत्थ काहे काला कइआ | केसुं केसु |

कुत इत्यस्य तु कओ ।

॥ किमः कस्त्रतसोश्च ॥ ८ । ३ । ७१ ॥ इत्यनेन किमः कः स्यादौ त्रतसोश्च परयोः ॥ इदमेतत्कियत्तद्भ्यष्टो ड्णिा ॥ ८ । ३ । ६९ ॥ ऐभ्यः सर्वादिभ्योऽकारान्तेभ्यः परस्याष्टायाः स्थाने डित् इणा इत्यादेशः ॥ ङसेर्म्हा ॥ ८ । ३ । ६६ ॥ कियत्तद्भ्यः परस्य ङ

सेर्म्हा इत्यादेशो वा ॥ किमो डिणोडीसौ ॥ ८ । ३ । ६८ ॥ इत्यनेन किमः परस्य ङसेर्डिणो डीस इत्यादेशौ वा ॥ किंयत्तद्भ्यो ङसः ॥ ८ । ३ । ६३ ॥ इत्यनेन ङसः स्थाने डास इत्यादेशो वा । ङसः स्सः ॥ ८ । ३ । १० ॥ इत्यनेन ङसः स्थाने स्सः किंतद्भ्यां डासः ॥ ८ । ३ । ६२ ॥ इत्यनेनामः स्थाने डास इत्यादेशो वा । ङेर्डाहे डाला इआ काले ॥ ८ । ३ । ६५ ॥ अनेन ङेः स्थाने कालेऽभिधेये डाहे डाला, इआ वा भवन्ति ।

## ॥ अथ यच्छब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जो | जे |
| द्वितीया | जं | जे जा |
| तृतीया | जिणा जेणं जेण | जेहि जेहिं जेहिँ |
| पंचमी | जम्हा जत्तो जाओ<br>जाउ जाहि<br>जाहिन्तो जा | जत्तो जाओ जाउ<br>जाहि जेहि<br>जाहिन्तो जेहिन्तो<br>जासुन्तो जेसुन्तो |
| षष्ठी | जास जस्स | जेसिं जाणं जाण |
| सप्तमी | जस्सि जम्मि<br>जत्थ जहिं<br>जाहे जाला जइआ | जेसुं जेसु |

यत इत्यस्य जओ

## ॥ अथ तच्छब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सो स | ते |
| द्वितीया | तं णं | ते ता |
| तृतीया | तिणा णेण तेणं तेण | तेहि तेहिं तेहिँ णेहिं |
| पंचमी | तो तम्हा तत्तो ताओ ताउ ताहि ताहिन्तो ता | तत्तो ताओ ताउ ताहि तेहि ताहिन्तो तेहिन्तो तासुन्तो तेसुन्तो |
| षष्ठी | तास तस्स से | तास तेसिं सिं ताणं ताण |
| सप्तमी | तस्सि तम्मि तत्थ तहिं ताहे, ताला तइआ | तेसुं तेसु |

तत इत्यस्य तओ

॥ तदश्च तः सोऽक्लीबे ॥ ८ । ३ । ८६ ॥ इत्यनेन तद एतदश्च तकारस्य सौ सः ॥ वैतत्तदः ॥ ८ । ३ । ३ ॥ इत्यनेन सेर्डो वा । तदो णः स्यादौ क्वचित् ॥ ८ । ३ । ७० ॥ इत्यनेन तदः स्थाने णकारः क्वचित् । द्वितीयातृतीयाविभक्तावेव दृश्यते नान्यत्र तत्रापि द्वितीयाबहुवचने तु न ॥ तदो डोः ॥ ८ । ३ । ६७ ॥ इत्यनेन तदः परस्य ङसेर्डो इत्यादेशो वा ॥ वेदं-तदेतदो ङसाम्भ्यां से-सिमौ ॥ ८ । ३ । ८१ ॥ इत्यनेनेदम्तदेतदित्येतेषां स्थाने ङस्-आमित्येताभ्यां सह यथासंख्यं से-सिमित्यादेशौ वा भवतः ।

## ॥ अथैतच्छब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | एसो एस<br>इणं इणमो | एते एए |
| द्वितीया | एतं एअं | एते एता<br>एए एआ |
| तृतीया | एदिणा एदेणं एदेण<br>एएणं एएण | एतेहि एतेहिं एएहिँ<br>एएहि इत्यादि |
| पंचमी | एत्तो एत्ताहे<br>एआओ एआउ<br>एआहि एआहिन्तो<br>एआ | एअत्तो एआओ<br>एआउ एआहि<br>एएहिं एआहिन्तो<br>एएहिन्तो एआसुन्तो<br>एएसुन्तो |
| षष्ठी | से एअस्स | सिं एएसिं<br>एआणं एआण |
| सप्तमी | एअस्सि एअम्मि<br>एत्थ अयम्मि<br>ईअम्मि | एएसुं एएसु |

॥ वैसेणमिणमो सिना ॥ ८ । ३ । ८५ ॥ इत्यनेनैतदः स्थाने सिना सह एस इणं इणमो इत्यादेशा वा । वैतदो ङसे त्तो-ताहे ॥ ८ । ३ । ८२ ॥ इत्यनेनैतदः परस्य ङसेः त्तो ताहे इत्यादेशौ वा ॥ एरदीतौ म्मौ वा ॥ ८ । ३ । ८४ ॥ इत्यनेनैतद एकारस्य ङ्यादेशे

म्मौ परे अदीतौ वा ॥ त्थे च तस्य लुक् ॥ ८ । ३ । ८३ ॥ इत्यनेनैतदः त्थे परे चकारात् त्तो-ताहे च परतः तस्य लुक् । यथा । एत्थ, एत्तो, एत्ताहे ।

## ॥ अथेदम्-शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अयं इमो | इमे |
| द्वितीया | इमं णं इणं | इमे इमा णे |
| तृतीया | णेण इमिणा इमेणं इमेण | एहि णेहि इमेहि इमेहिं इमेहिँ |
| पंचमी | इमत्तो इमाओ इमाउ इमाहि इमाहिन्तो इमा | इमत्तो इमाओ इमाउ इमाहि इमेहि इमाहिन्तो इमेहिन्तो इमासुन्तो इमेसुन्तो |
| षष्ठी | अस्स इमस्स से | सिं इमेसिं इमाणं इमाण |
| सप्तमी | अस्सिं इमस्सिं इमम्मि इह | एसुं एसु इमेसुं इमेसु |

॥ पुं-स्त्रियोर्नवायमिमिआ सौ ॥ ८ । ३ । ७३ ॥ इत्यनेनेदमूशब्दस्य अयमिति आदेशः सौ पुंसि । स्त्रिलिङ्गे तु इमिआ इति ॥ इदम इमः ॥ ८ । ३ । ७२ ॥ इत्यनेनेदमः स्यादौ परे इमः ॥ णोऽम्-शस्-टा-भिसि ॥ ८ । ३ ।७७ ॥ इत्यनेनेदमः अम् शस्टाभिस्सु परेषु ण इत्यादेशः ॥ स्सि-स्सयोरत् ॥ ८ । ३ । ७४ ॥

इत्यनेनेदमः । स्सि-स्स इत्येतयोः परयोरदादेशो वा । अमेणम् ॥ ८ । ३ । ७८ ॥ इत्यनेनेदमोऽमा सह इणमित्यादेशः ॥ ङेर्मेन हः ॥ ८ । ३ । ७५ ॥ इत्यनेनेदमः कृतेमादेशात्परस्य ङेर्मेन सह ह इत्यादेशो वा ।

## ॥ अथादस्शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | अह अमू | अमुणो अमउ अमओ अमवो अमू |
| **द्वितीया** | अमुं | अमू अमुणो |
| **तृतीया** | अमुणा | अमूहिं अमूहि अमूहिँ |
| **पंचमी** | अमुणो अमूओ अमुत्तो अमूउ अमूहिन्तो | अमूओ अमुउ अमुत्तो अमूहिन्तो अमूसुन्तो |
| **षष्ठी** | अमुणो अमुस्स | अमूणं अमूण |
| **सप्तमी** | अयम्मि इअम्मि अमुम्मि | अमूसुं अमूसु |

॥ वादसो दस्य होऽनोदाम् ॥ ८ । ३ । ८७ ॥ इत्यनेनादसो दकारस्य सौ परे ह इत्यादेशो वा ॥ मुः स्यादौ ॥ ८ । ३ । ८८ ॥ इत्यनेनादसो दस्य स्यादौ मुरित्यादेशः ।

॥ अक्लीबे सौ ॥ ८ । ३ । १९ ॥ इत्यनेन सौ परे दीर्घे कृते अमू इति रूपम् ॥ पुंसि जसो डउ डओ वा ॥ ८ । ३ । २० ॥ इत्यनेन इदुतः परस्य जसः स्थाने पुंसि अउ, अओ इत्यादेशौ डितौ वा भवतः ॥ वोतो डवो ॥ ८ । ३ । २१ ॥ इत्यनेन उदन्तात्परस्य जसः पुंसि डित् अवो इत्यादेशो वा ॥ जस्-शसोर्णो वा ॥ ८ । ३ । २२ ॥ इत्यनेन इदुतः परयोर्जस्-शसोः पुंसि णो इत्यादेशो वा ॥ लुप्ते शसि ॥ ८ । ३ । १८ ॥ इत्यनेन इदुतोर्दीर्घो भवति शसि लुप्ते

सति ॥ टो णा ॥ ८ । ३ । २४ ॥ इत्यनेन पुंक्लीबे वर्तमानादिदुतः परस्य ट इत्यस्य णा इत्यादेशः ।

॥ इदुतो दीर्घः ॥ ८ । ३ । १६ ॥ इत्यनेन इकारस्य उकारस्य च भिस्-भ्यस्-सुप्सु-परेषु दीर्घः ॥ ङसि-ङसोः पुंक्लीबे वा ॥ ८ । ३ । २३ ॥ इत्यनेन पुंसि क्लीबे च वर्त्तमानादिदुतः परयोर्ङसिङसोर्णो इत्यादेशो वा । पञ्चम्येकवचने हिलुकौ निषेध्येते । पञ्चमीबहुवचने च हिर्निषेध्यते ॥ म्वावयेऔ वा ॥ ८ । ३ । ८९ ॥ इत्यनेना-दसोऽन्त्यव्यञ्जनस्य लुकि दकारान्तस्य स्थाने ङ्यादेशे म्मौ परे अय इअ इत्यादेशौ वा ।

## ॥ अथ युष्मच्छब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | तं तुं तुवं<br>तुह तुमं | भे तुब्भे तुज्झ<br>तुम्ह तुय्हे उय्हे<br>तुम्हे तुज्झे |
| **द्वितीया** | तं तुं तुमं तुवं<br>तुह तुमे तुए | तुज्झ तुब्भे तुम्हे<br>तुज्झे तुय्हे उय्हे भे |
| **तृतीया** | भे दि दे ते तइ<br>तए तुमं तुमइ<br>तुमए तुमे तुमाइ | भे तुब्भेहिं तुम्हेहिं<br>तुज्झेहिं उज्झेहिं<br>उम्हेहिं तुय्हेहिं उय्हेहिं |
| **पंचमी** | तइत्तो तुवत्तो<br>तुमत्तो तुहत्तो<br>तुब्भत्तो तुम्हत्तो<br>तुज्झत्तो<br>एवं पञ्चम्येकवचने दो<br>दु-हिन्तो-लुक्ष्वप्युदाहार्यम्<br>तुय्ह तुब्भ तुम्ह<br>तुज्झ तहिन्तो | तुब्भत्तो तुम्हत्तो<br>तुज्झत्तो तुय्हत्तो<br>उय्हत्तो उम्हत्तो<br>एवं दो-दु-हि-हिन्तो-<br>सुन्तोष्वप्युदाहार्यम् । |

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| षष्ठी | तइ तु ते<br>तुम्हँ तुह तुहं<br>तुव तुम तुमे<br>तुमो तुमाइ दि दे<br>इ ए तुब्भ तुम्ह<br>तुज्झ उब्भ उम्ह<br>उज्झ उय्ह | तु वो भे तुब्भ<br>तुम्ह तुज्झ तुब्भं<br>तुम्हं तुज्झं तुब्भाण<br>तुब्भाणं तुम्हाण<br>तुम्हाणं तुज्झाण<br>तुज्झाणं तुवाण<br>तुवाणं तुमाण<br>तुमाणं तुहाण<br>तुहाणं उम्हाण उम्हाणं |
| सप्तमी | तुमे तुमए<br>तुमाइ तइ<br>तए तुम्मि<br>तुवम्मि तुमम्मि<br>तुहम्मि तुब्भम्मि<br>तुम्हम्मि तुज्झम्मि | तुसु तुवेसु तुमेसु<br>तुहेसु तुब्भेसु<br>तुम्हेसु तुज्झेसु<br>केचित्तु सुप्येत्वविक-<br>ल्पमिच्छन्ति । तन्मते<br>तुवसु तुमसु<br>तुहसु तुब्भसु<br>तुम्हसु तुज्झसु<br>तुब्भस्यात्वमपीच्छ-<br>त्यन्यः । तुब्भासु<br>तुम्हासु तुज्झासु |

॥ अथास्मच्छब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | म्मि अम्मि अम्हि<br>हं अहं अहयं | अम्ह अम्हे अम्हो<br>मो वयं भे |

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **द्वितीया** | णे णं मि अम्मि<br>अम्ह मम्ह मं<br>ममं मिमं अहं | अम्हे अम्हो<br>अम्ह णे |
| **तृतीया** | मि मे ममं<br>ममए ममाइ मइ<br>मयाइ मए णे | अम्हेहिं अम्हाहिं<br>अम्ह अम्हे णे |
| **पंचमी** | मइत्तो ममत्तो<br>महत्तो मज्झत्तो<br>एवं दो-दु-हि-हिन्तो-<br>लुक्ष्वप्युदाहार्यम् । मत्तो<br>इति तु मत्त इत्यस्य | ममत्तो अम्हत्तो<br>ममाहिन्तो अम्हाहिन्तो<br>ममासुन्तो अम्हासुन्तो<br>ममेसुन्तो अम्हेसुन्तो<br>इत्यादि |
| **षष्ठी** | मे मइ मम मह<br>महं मज्झ मज्झं<br>अम्ह अम्हं | णे णो मज्झ<br>अम्ह अम्हं अम्हे<br>अम्हो अम्हाण<br>अम्हाणं ममाण ममाणं<br>महाण महाणं<br>मज्झाण मज्झाणं |
| **सप्तमी** | मि मइ ममाइ<br>मए मे अम्हम्मि<br>ममम्मि महम्मि<br>मज्झम्मि | अम्हेसु ममेसु<br>महेसु मज्झेसु<br>एत्वविकल्पमते तु<br>अम्हसु ममसु<br>महसु मज्झसु<br>अम्हस्यात्वमपीच्छत्यन्य<br>अम्हासु |

## ॥ अथाकारान्तस्त्रीलिङ्गः ॥

### ॥ मालाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | माला | मालाउ मालाओ माला |
| द्वितीया | मालं | मालाउ मालाओ माला |
| तृतीया | मालाअ मालाइ मालाए | मालाहि मालाहिं मालाहिँ |
| पंचमी | मालाअ मालाइ मालाए मालत्तो मालाओ मालाउ मालाहिन्तो | मालत्तो मालाओ मालाउ मालाहिन्तो मालासुन्तो |
| षष्ठी | मालाअ मालाइ मालाए | मालाणं मालाण |
| सप्तमी | मालाअ मालाइ मालाए | मालासुं मालासु |
| संबोधनम् | हे माले हे माला | हे मालाउ हे मालाओ हे माला |

### ॥ अथ रमाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | रमा | रमाउ रमाओ रमा |
| द्वितीया | रमं | रमाउ रमाओ रमा |
| तृतीया | रमाअ रमाइ रमाए | रमाहि रमाहिं रमाहिँ |

| | | |
|---|---|---|
| **पंचमी** | रमाअ रमाइ<br>रमाए रमत्तो<br>रमाओ रमाउ<br>रमाहिन्तो | रमत्तो रमाओ<br>रमाउ रमाहिन्तो<br>रमासुन्तो |
| **षष्ठी** | रमाअ रमाइ<br>रमाए | रमाणं रमाण |
| **सप्तमी** | रमाअ रमाइ<br>रमाए | रमासुं रमासु |
| **संबोधनम्** | हे रमे हे रमा | हे रमाउ हे रमाओ<br>हे रमा |

॥ स्त्रियामुदोतौ वा ॥ ८ । ३ । २७ ॥ इत्यनेन स्त्रियां वर्त्तमानान्नाम्नः परयोर्जस्-शसोः स्थाने प्रत्येकं उत् ओत् इत्येतौ सप्राग्दीर्घौ वा भवतः ॥ ह्रस्वोऽमि ॥ ८ । ३ । ३६ ॥ इत्यनेन स्त्रीलिङ्गस्य नाम्नोऽमि परे ह्रस्वो भवति । मालं, नइं, इत्यादि ॥ टा-ङस्-ङेरदादिदेद्वा तु ङसेः ॥ ८ । ३ । २९ ॥ इत्यनेन स्त्रियां टा-ङस्ङीनां स्थाने प्रत्येकं अत्, आत्, इत्, एत्, इत्येते चत्वार आदेशा भवन्ति ङसेः पुनरेते सप्राग्दीर्घा वा ॥ नात आत् ॥ ८ । ३ । ३० ॥ इत्यनेन स्त्रियामादन्तान्नाम्नः परेषां टा-ङस्-ङि-ङसीनामादादेशो न भवति ॥ वाप ए ॥ ८ । ३ । ४१ ॥ इत्यनेनामन्त्रणे सौ परे आप एत्वं वा भवति ।

## ॥ अथ शृङ्खलाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | संकला | संकलाउ संकलाओ<br>संकला |
| **द्वितीया** | संकलं | संकलाउ संकलाओ<br>संकला |

इत्यादि मालाशब्दवद्रूपाणि ॥ शृङ्खले खः कः ॥ ८ । १ । १८९ ॥ इत्यनेन खस्य कः ।

## ॥ अथ सटाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सढा | सढाउ सढाओ सढा |

इत्यादि मालावत् ॥ सटा-शकट-कैटभे ढः ॥ ८ । १ । १९६ ॥ इत्यनेन टस्य ढः ।

## ॥ अथ प्रतिमाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पडिमा | पडिमाउ पडिमाओ पडिमा |

इत्यादि मालावत्

## ॥ अथ पताकाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पडाआ | पडाउ पडाओ पडाआ |
| **द्वितीया** | पडाअं | पडाउ पडाओ पडाआ |

इत्यादि

## ॥ अथ प्रतिज्ञाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | पइण्णा | पइण्णाउ पइण्णाओ पइण्णा |

इत्यादि

## ॥ अथ प्रतिष्ठाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | परिट्ठा पइट्ठा | परिट्ठाउ परिट्ठाओ परिट्ठा पइट्ठाउ पइट्ठाओ पइट्ठा |

इत्यादि ॥ निष्प्रती ओत्परीमाल्य-स्थोर्वा ॥ ८ । १ । ३८ ॥ इत्यनेन निर्प्रति इत्येतौ माल्यशब्दे स्थाधातौ च परे यथासङ्ख्यं ओत् परि इत्येवंरूपौ वा भवतः ।

## ॥ अथोपमाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | उवमा | उवमाउ उवमाओ उवमा |

इत्यादि मालावत्

## ॥ अथ शिफाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | सिभा | सिभाउ सिभाओ सिभा |

इत्यादि ॥ फो भ-हौ ॥ ८ । १ । २३६ ॥ इत्यनेन फस्य भकारः ।

## ॥ अथ स्पृहाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | छिहा | छिहाउ छिहाओ छिहा |

इत्यादि ॥ स्पृहायाम् ॥ ८ । २ । २३ ॥ इत्यनेन स्पृहाशब्दे संयुक्तस्य छः ।

## ॥ अथ शय्याशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सेज्जा | सेज्जाउ सेज्जाओ<br>सेज्जा |

इत्यादि ॥ एच्छय्यादौ ॥ ८ । १ । ५७ ॥ इत्यनेन शय्याशब्दे आदेरस्य एत्त्वं ॥ द्य-य्य-र्यां जः ॥ ८ । २ । २४ ॥ इत्यनेन जः ।

## ॥ अथ भार्याशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | भज्जा | भज्जाउ भज्जाओ<br>भज्जा |

इत्यादि ॥ चौर्यसमत्वात्, भारिया इत्याद्यपि मालावत्

## ॥ अथ मृत्तिकाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मट्टिआ | मट्टिआउ मट्टिआओ<br>मट्टिआ |

इत्यादि

## ॥ अथ वार्ताशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | वत्ता वट्टा | वत्ताउ वत्ताओ वत्ता<br>वट्टाउ वट्टाओ वट्टा |

इत्यादि

## ॥ अथोल्काशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | उक्का | उक्काउ उक्काओ उक्का |

इत्यादि

## ॥ अथ प्रज्ञाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | पज्जा पण्णा | पज्जाउ पज्जाओ<br>पज्जा पण्णाउ<br>पण्णाओ पण्णा |

इत्यादि

## ॥ अथ संज्ञाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | संज्जा सण्णा | संज्जाउ संज्जाओ<br>संज्जा सण्णाउ<br>सण्णाओ सण्णा |

इत्यादि

## ॥ अथाऽऽज्ञा शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अज्जा आणा | अज्जाउ अज्जाओ<br>अज्जा आणाउ<br>आणाओ आणा |

इत्यादि ॥ ज्ञो ञः ॥ ८ । २ । ८३ ॥ इत्यनेन ज्ञः सम्बन्धिनो ञस्य लुग् वा ।

## ॥ अथ चन्द्रिकाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | चन्दिमा | चन्दिमाउ चन्दिमाओ चन्दिमा |

इत्यादि ॥ चन्द्रिकायां मः ॥ ८ । १ ।१८५ ॥ इत्यनेन कस्य मः ।

## ॥ अथ शाखाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | साहा | साहाउ साहाओ साहा |

इत्यादि

## ॥ अथ चपेटाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | चविला चविडा | चविलाउ चविलाओ चविला चविडाउ चविडाओ चविडा |

इत्यादि ॥ एत इद्वा वेदना-चपेटा-देवर-केसरे ॥ ८ । १ । १४६ ॥ इत्यनेन एत इत्त्वं वा । पक्षे चवेडा इत्याद्यपि ॥ चपेटा-पाटौ वा ॥ ८ । १ । १९८ ॥ इत्यनेन टस्य लो वा ।

## ॥ अथ यमुनाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जउँणा | जउँणाउ जउँणाओ जउँणा |

इत्यादि

## ॥ अथ चामुण्डाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | चाउँण्डा | चाउँण्डाउ चाउँण्डाओ चाउँण्डा |

इत्यादि ॥ यमुना-चामुण्डा-कामुकातिमुक्तके मोऽनुनासिकश्च ॥ ८ । १ । १७८ ॥ इत्यनेन मस्य लुग् भवति लुकिच सति मस्य स्थाने अनुनासिकः ।

## ॥ अथ क्षुध्शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | छुहा | छुहाओ छुहाउ छुहा |

इत्यादि ॥ क्षुधो हा ॥ ८ । १ । १७ ॥ इत्यनेन क्षुध्शब्दस्यान्त्यव्यञ्जनस्य हादेशो भवति ।

## ॥ अथाप्सरस्शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | अच्छरसा अच्छरा | अच्छरसाउ अच्छरसाओ अच्छरसा अच्छराउ अच्छराओ अच्छरा |

इत्यादि ॥ आयुरप्सरसोर्वा ॥ ८ । १ । २० ॥ इत्यनेनान्त्यव्यञ्जनस्य सो वा भवति ॥ ह्रस्वात् थ्य-श्च-त्स-प्सा-मनिश्चले ॥ ८ । २ । २१ ॥ इत्यनेन छः ।

## ॥ अथ क्षुधाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| **प्रथमा** | छुहा | छुहाउ छुहाओ छुहा |

इत्यादि ॥ षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः ॥ ८ । १ । २६५ ॥ इत्यनेन छः ।

## ॥ अथ शिराशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | छिरा सिरा | छिराउ छिराओ छिरा<br>सिराउ सिराओ सिरा |

इत्यादि ॥ शिरायां वा ॥ ८ । १ । २६६ ॥ इत्यनेन वा छः ।

## ॥ अथ क्षमाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | छमा | छमाउ छमाओ छमा |

इत्यादि ॥ क्षमायां कौ ॥ ८ । २ । १८ ॥ इत्यनेन कौ पृथिव्यां वर्त्तमाने क्षमाशब्दे संयुक्तस्य छः । छमा पृथिवी । क्ष्मा इत्यस्यापि भवति । क्ष्मा, छमा । क्ष्मा-श्लाघा-रत्नेऽन्त्यव्यञ्जनात् ॥ ८ । २ । १०१ ॥ इत्यनेन संयुक्तस्यान्त्यव्यञ्जनात्पूर्वोऽद्भवति । तेन छमा इति रूपं सिद्धं । काविति किम् । खमा क्षान्तिरित्यत्र न ।

## ॥ अथ मक्षिकाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मच्छिआ | मच्छिआउ मच्छिआओ<br>मच्छिआ |

इत्यादि मालावत्

## ॥ अथ ककुभ्शब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | कउहा | कउहाउ कउहाओ<br>कउहा |

इत्यादि ॥ ककुभो हः ॥ ८ । १ । २१ ॥ इत्यनेन ककुभ्-शब्दस्यान्त्यव्यञ्जनस्य हो वा भवति ।

**॥ अथोत्कण्ठाशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | उक्कण्ठा | उक्कण्ठाउ उक्कण्ठाओ उक्कण्ठा |

इत्यादि

**॥ अथ पद्माशब्दः ॥**

| | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|
| **प्रथमा** | पोम्मा पउमा | पोम्माउ पोम्माओ पोम्मा पउमाउ पउमाओ पउमा |
| **द्वितीया** | पोम्मं पउमं | प्रथमाबहुवचनवत् |
| **तृतीया** | पोम्माअ पोम्माइ पोम्माए पउमाअ पउमाइ पउमाए | पोम्माहि पोम्माहिं पोम्माहिँ पउमाहि पउमाहिं पउमाहिँ |
| **पंचमी** | पोम्माअ पोम्माइ पोम्माए पोम्मत्तो पोम्माओ पोम्माउ पोम्माहिन्तो पउमाअ पउमाइ पउमाए पउमत्तो पउमाओ पउमाउ पउमाहिन्तो | पोम्मत्तो पोम्माओ पोम्माउ पोम्माहिन्तो पोम्मासुन्तो पउमत्तो पउमाओ पउमाउ पउमाहिन्तो पउमासुन्तो |

| | | |
|---|---|---|
| षष्ठी | तृतीयावत् | पोम्माणं पोम्माण<br>पउमाणं पउमाण |
| सप्तमी | तृतीयावत् | पोम्मासुं पोम्मासु<br>पउमासुं पउमासु |
| संबोधनम् | हे पोम्मे हे पोम्मा<br>हे पउमे हे पउमा | प्रथमाबहुवचनवत् |

**॥ अथार्याशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | अज्जा आरिआ | अज्जाउ अज्जाओ<br>अज्जा आरिआउ<br>आरिआओ आरिआ |

इत्यादि ॥ श्वश्रूवाचिआर्याशब्दस्य तु अज्जू इति रूपं भवति तस्य रूपाणि वधूवज्ज्ञेयानि ।

**॥ अथ मर्यादाशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | मज्जाआ | मज्जाआउ मज्जाआओ<br>मज्जाआ |

इत्यादि मालावत्

**॥ अथ जिह्वाशब्दः ॥**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जिब्भा जीहा | जिब्भाउ जिब्भाओ<br>जिब्भा जीहाउ<br>जीहाओ जीहा |

इत्यादि ॥ ह्वो भो वा ॥ ८ । २ । ५७ ॥ इत्यनेन ह्वस्य भो वा ॥ ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या ॥ ८ । १ । ९२ ॥ इत्यंनेन इकारस्य ईः ।

## ॥ अथ श्रद्धाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सङ्ढा सद्धा | सङ्ढाउ सङ्ढाओ सङ्ढा<br>सद्धाउ सद्धाओ सद्धा |
| द्वितीया | सङ्ढं सद्धं | सङ्ढाउ सङ्ढाओ सङ्ढा<br>सद्धाउ सद्धाओ सद्धा |

इत्यादि ॥ श्रद्धर्द्धि-मूर्धाऽर्धेऽन्ते वा ॥ ८ । २ । ४१ ॥ इत्यनेन अन्ते वर्तमानस्य संयुक्तस्य ढो वा भवति ।

## ॥ अथ सन्ध्याशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | संझा | संझाउ संझाओ<br>संझा |

इत्यादि

## ॥ अथ परिखाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | फलिहा | फलिहाउ फलिहाओ<br>फलिहा |

इत्यादि

## ॥ अथ स्नुषाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सुण्हा सुसा | सुण्हाउ सुण्हाओ<br>सुण्हा सुसाउ<br>सुसाओ सुसा |

इत्यादि ॥ स्नुषायां ण्हो नवा ॥ ८ । १ । २६१ ॥ इत्यनेन षस्य ण्हः ।

## ॥ अथ ज्योत्स्नाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जोण्हा | जोण्हाउ जोण्हाओ<br>जोण्हा |

इत्यादि मालावत्

## ॥ अथ श्यामाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सामा | सामाउ सामाओ<br>सामा |

इत्यादि ॥ अधो म-न-याम् ॥ ८ । २ । ७८ ॥ इत्यनेन मस्य लुक् ।

## ॥ अथ व्रीडाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | विड्डा | विड्डाउ विड्डाओ<br>विड्डा |

इत्यादिमालावत् । षष्ठी॰ । २ । ९८ ॥ इत्यनेन डस्य द्वित्वम् ।

म्यापि

## ॥ अथ श्लाघाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सलाहा | सलाहाउ सलाहाओ सलाहा |

इत्यादि ॥ क्ष्मा-श्लाघा-रत्नेऽन्त्यव्यञ्जनात् ॥ ८ । २ । १०१ ॥ इत्यनेन अन्त्यव्यञ्जनात् पूर्वोऽद्भवति ।

## ॥ अथ क्रियाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | किरिआ | किरिआउ किरिआओ किरिआ |

इत्यादि ॥ ई-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित् ॥ ८ । २ । १०४ ॥ इत्यनेनान्त्यव्यञ्जनात्पूर्व इकारः । आर्षमते तु हयं नाणं कियाहीणं इति ।

## ॥ अथ गर्हाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | गरिहा | गरिहाउ गरिहाओ गरिहा |

इत्यादि

## ॥ अथ ज्याशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | जीआ | जीआउ जीआओ जीआ |

इत्यादि ॥ ज्यायामीत् ॥ ८ । २ । ११५ ॥ इत्यनेन ज्याशब्देऽन्त्यव्यञ्जनात्पूर्व ईकारः ।

## ॥ अथ वनिताशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | विलया वणिआ | विलयाउ विलयाओ विलया वणिआउ वणिआओ वणिआ |

इत्यादि ॥ वनिताया विलया ॥ ८ । २ । १२८ ॥ इत्यनेन वनिताया विलयादेशो वा भवति ।

## ॥ अथ दंष्ट्राशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | दाढा | दाढाउ दाढाओ दाढा |

इत्यादि ॥ दंष्ट्राया दाढा ॥ ८ । २ । १३९ ॥ इत्यनेन दाढादेशः ।

## ॥ अथ सेवाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सेव्वा सेवा | सेव्वाउ सेव्वाओ सेव्वा सेवाउ सेवाओ सेवा |

इत्यादि ॥ सेवादौ वा ॥ ८ । २ । ९९ ॥ इत्यनेन वा द्वित्वम् ।

## ॥ अथाबन्तः स्त्रीलिङ्गः सर्वाशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमा | सव्वा | सव्वाउ सव्वाओ सव्वा |

इत्यादि मालावत् । षष्ठीबहुवचने तु, सव्वेसिं सव्वाण, इति विशेषः । एवं विश्वाशब्दस्यापि मालावत्, षष्ठीबहुवचने वीसेसिं,

वीसाण, इति । अन्याशब्दस्य, अन्नेसिं, अन्नाण, इत्यादि, शेषं मालावत् ।

## ॥ किंशब्दः ॥

| | एकवचनम् | बहुवचनम् |
|---|---|---|
